L
1896

T UNIVERSITY
16

M-177

शास्त्रमुक्तावळी - २१.

वाल्मीकिभावदीपः ।

शास्त्रमुक्तावळ्या मञ्जुभाषिण्याञ्च

सम्पादकेन

श्रीकांची प्रतिवादिभयंकरं अनन्ताचार्येण

विरचितः ।

(मूलव्याख्यानोभयात्मकः ।)

तेनैव संशोधितः ।

श्रीसुदर्शनमुद्राक्षरशालायाम्

अमुद्रयत ।

॥कांची॥

१९०४

अस्यपुनर्मुद्रणादिषु ग्रन्थकृतएवाधिकारः ।

इदानी मेतन्मूल्यं रूप्यम् १-०-०

L-1898

L-1898

भूमिका ।

इहकिल दुस्तरागाधानन्तमहादुःखास्पद संसारपारावार निमग्नाना मखिलानामपि चेतनानां तत्वहित पुरुषार्थबोधनेन समुत्तारकं मातापितृसहस्रेभ्योपि वत्सलतरं वेदाख्यंशास्त्रमेवेति सर्वाभ्युपगतोय मर्थः ।

तस्यैतस्यानन्त शाखस्य दुर्बोधस्य दुर्निर्णेयार्थस्य वेदस्यार्थनिर्णये इतिहासपुराणान्येव शरणमिति स्मरति भगवान्याज्ञवल्क्यः—

" इतिहासपुराणाभ्यां वेदं समुपबृंहयेत ।
बिभेत्यल्पश्रुता द्वेदो मामयं प्रतरिष्यति ॥ "

—इति ।

इतिहासपुराणेष्वपीति हासानामेवाभ्यर्हितत्वं पुराणशब्दा दल्पाच्तरादधिकाच्कमितिहासशब्दं पूर्वं प्रयुञ्जानेन मुनिनैव व्यक्तीकृतम् ।

इतिहासेष्वपि प्रधानभूतं श्रीरामायणं महाभारतंच । तत्रश्रीरामायणं तावदनुष्ठानोपदेशाभ्यां रूपौदार्यादिभिश्च सकलानपिचेतनान्मन्त्रमुग्धानिव स्वायत्तीकृत्य सत्पथे प्रवर्तयितु मिक्ष्वाकु कुलतिलकतया वतीर्णस्या चिन्त्याद्भुतस्वरूप रूपगुणस्य दयाराशेः परमपुरुषस्य परब्रह्माभिधानस्य लक्ष्मीसहायस्य चरितप्रतिपादनमुखेन वेदोपबृंहणं कुर्वन्महदुपकरोति ।

अस्य वेदोपबृंहण रूपता च

वेदोपबृंहणार्थाय तावग्राहयत प्रभुः । "

इत्यादिभि स्सुस्पष्टा ।

तदेत दितिहासरत्नं प्रणयता महर्षिणा वाल्मीकिना तत्रतत्र गूढमेव न्यबध्यत श्रुत्यन्तसिद्धा श्रियःपतिपरतत्वता ऽनधिकारिभ्यो बिभ्यता ।

इत्थमुपनिबद्धमपि परमपुरुष परतत्वभावं सुचिरश्रमैकाधिगम्यं हिरण्य निधिन्यायेनो पर्युपरि सञ्चरन्तोप्य नधिगच्छन्तो मास्म विनंक्ष्यन्नाधिकारि णोपीति यथागुरुमुखलब्धं प्राचीकशाम वयं कैश्चि द्धितपरै र्महद्भिः प्रोत्साहिताः।

प्रीयतां करुणानिधानं कमलाजानि रनेन सन्तश्चगुणग्राहिण इतिभू योभूयः प्रार्थयामहेतान् ।

इति - विहितनति र्निवेदयति,

प्रतिवादिभयंकरं अनन्तचार्यः ।

सम्पादकः ।



श्रियै नमः ।
श्री हयग्रीवाय नमः ॥

शास्त्रमुक्तावळी ।

श्रीमते रामानुजाय नमः ।

वाल्मीकि भाव दीपः ॥

अस्तु समस्तजग ज्जनिरक्षण संहरण विहरण श्रीमान् ।
करिगिरिशिखरविहारी कमलाकान्त श्शुभाय देवो नः ॥

अव्या दशेषजगतां भव्या योपात्तमनुज संहननः ।
निर्व्याजबन्धु रस्मा न्नव्याम्बुजलोचन स्स यतिराजः ॥

विदधाति वादिभीकृ द्गुरुवरवंश्य स्सुधी रनन्तार्यः ।
वाल्मीकिभावदीपं विचिन्त्य चित्ते मह स्तुरंगास्यम् ॥

इह किल स भगवा न्परमकारुणिको वल्मीकजन्मा मुनि रपारदुस्तरागाध संसार पारावारकृतमज्जनान्, अनाद्यविद्यासञ्चित पुण्यपापात्मक निजनिजकर्म वशंवदान्, अनवरत विहित सुरनर तिर्यक्स्थावरादि विविध विचित्र जन्मनः, अविदित परावर तत्वयाथात्म्या ननन्तान् जीवसंघां त्समुद्दिधीर्षुः; चिदचिदीश्वर स्वरूपस्वभावावबोधकं अपौरुषेयतया नित्यनिर्दोषं, अविच्छिन्न सम्प्रदायागतं, मातापितृ सहस्रेभ्योपि वत्सलतमं, सकलजगदुज्जीवनैक प्रयोजनं, प्रमाणसार्व भौमं, वेदराशिं - उपबृंहयन् ; श्रुतिशिरोगहन गुहानिगूढं, अखिलहेयप्रत्यनीक कल्याणगुणैकतानं, निखिल जगदुदय विभवलयलीलं, सन्ततसन्तन्यमान भव भयाभितप्तजीवजात समुज्जीवन चिन्तासन्तानं, अखिलजगदेक शरण्यं, परंब्रह्म श्रियःपतिः पुरुषोत्तमो वैकुण्ठधामा भगवा न्नारायणएवेति श्रुत्यन्तसिद्धै रन न्यथासिद्धै र्हेतुभि श्श्रीमति रामायणे निश्चिकाय । अतिरस्य मेत द्रहस्य

मजानतां हिरण्यनिधिन्याय मनुसरता मापातप्रतीतार्थमात्र परितृप्ताना मेतदर्थाव बोधनाय प्रवृत्तो ग्रन्थकृद मुमर्थं सामान्यतः प्रतीजानीते (वाल्मीकिरिति)

वाल्मीकि स्तपसांनिधि र्मुनिवरो वेधोवरोत्तम्भित-
ज्ञान स्सूनृतवा ग्भवाम्बुधिगता नुद्धर्तुकामो जनान् ।
वेदान प्युपबृंहयन् श्रुतिशिरोगूढं शुभैकास्पदं
तत्वं निश्चिनुतेस्म रामवपुषं रामायणे श्रीपतिम् ॥ १ ॥

" वाल्मीकिः " - वल्मीकस्या पत्यं पुमान् । यद्यपि मुने रस्य-

" ऋक्षोभू द्भार्गव स्तस्मा द्वाल्मीकि र्योभिधीयते । "

इति विष्णुपुराणवचनेन भृगुपुत्रत्वमेव प्रतीयते । तथापि वल्मीकावृत मूर्ते र्वरुणकृत वर्षेण वल्मीका त्प्रादुर्भूतत्वेन तावन्मात्रमवलम्ब्या गस्त्यस्य कल शीसुतत्व व्यपदेशव द्वल्मीकापत्य त्वोपचारइति न दोषः । उक्तंच ब्रह्मकैवर्ते-

" अथाब्रवी न्महातेजा ब्रह्मा लोक पितामहः ।
वल्मीकप्रभवो यस्मा त्तस्मा द्वाल्मीकि रित्यसौ ॥ "
—इति ।

वाल्मीकिशब्देन चास्य तृणीकृत शीतोष्णादि द्वन्द्व जातस्य निरन्तर तपोविशेष कृतसङ्कल्पस्य स्थानादचलतो वल्मीकावृतिर्जाते त्यर्थबोधनेन शमदमादि गुणसम्पत्ति र्द्योत्यते ।

" तपसांनिधि " रित्यनेनास्य तपःप्रभावलब्धज्ञानता सूचनद्वारा तदीय ज्ञानस्य मोहादिसंवलितत्वा भावद्योतनेन एतदुक्तार्थस्य प्रामाणिक तमत्वं ज्ञाप्यते ।

"मुनिवर" इत्यनेन निरन्तरमननशीलता लाभेनै तदुक्तार्थस्या पात प्रतीति मूलकत्वाभाव युक्तितःप्रतिष्ठितत्वयो स्सूचनमुखेन तर्काभासै रप्रकम्प्यत्वं सूच्यते ।

वेधसः—चतुर्मुखस्य, वरेण, उत्तम्भितं - उच्चैरवष्टब्धं, सर्वविषयकत्व याथार्थ्याद्यापादनेन सम्यगभिवर्धित मित्यर्थः, ज्ञानं, यस्यसः। चतुर्मुख वरप्रसाद लब्ध सार्वज्ञ्यवानितियावत् ।

यथोक्तं बालकाण्डे द्वितीयसर्गे —

" मच्छन्दादेव ते ब्रह्मन् प्रवृत्तेयं सरस्वती ।
रामस्य चरितं सर्वं कुरुत्व मृषिसत्तम ॥
धर्मात्मनो गुणवतो लोके रामस्य धीमतः ।
वृत्तं कथय धीरस्य यथा ते नारदा च्छ्रुतम् ॥
रहस्यंच प्रकाशंच यद्वृत्तं तस्य धीमतः ।
रामस्य सह सौमित्रे राक्षसानां च सर्वशः ॥
वैदेह्याश्चापि यद्वृत्तं प्रकाशं यदिवा रहः।
तच्चाप्यविदितं सर्वं विदितं ते भविष्यति ॥ "

— इति ।

एतेनास्य पुलस्त्यवसिष्ठवरप्रसादेन पराशरस्येव पारमार्थ्यवेदित्वं द्योतितम्।

" सूनृतवाक् " - सूनृता - अबाधितार्था, वाक्- वचनं, यस्यसः यथादृष्टाबाधितार्थवादीत्यर्थः । अनेन रामायणोक्तार्थस्य राजसतामसस्मृतिपुराणादिवचन विरोधेन बाधशंका परास्ता, एतद्विरोधेनैव तेषामपि नेयत्वंच सूचितं । तथोक्तं तत्रैव सर्गे —

" न ते वा गनृता काव्ये काचिदत्र भविष्यति । "

— इति ।

अथ मुने रामायणमुखेन तत्वनिर्णये प्रयोजनं दर्शयति (भवाम्बुधिगतानिति) भवः - संसारः, तद्रूपो योम्बुधिः, तं प्राप्तान् ; संसार सागरनिमग्ना नित्यर्थः ।

" उद्धर्तुकामः " - उद्धर्तुं - उत्तीर्णान् कर्तुं, कामः - अभिलाषः, यस्यसः । स्वतः परमदयालुतया संसारिजनानां तत्वविमूढानां तत्वार्थावबोध नेन रक्षण माकांक्षमाण इत्यर्थः ।

ननु - त्रैवर्णिकानां " स्वाध्यायोध्येतव्य " इति विधिबलप्राप्ताध्यय- नानां विधिव दाचार्य मुपसन्नानां श्रुतवेदान्तानां कृतमीमांसानां तत्वार्थनि- र्णयो भविष्यतीति तावतैव संसारोत्तरणसम्भवा त्कि मनेनेत्यत्राह (जना- निति) ब्राह्मणक्षत्रियवैश्यशूद्रादीन् जननधर्मवतः सर्वा नित्यर्थः । तथाच वेदान्तश्रवणेन त्रैवर्णिकानां तन्निर्णयसम्भवेपि शूद्रादीनां वेदाध्ययनश्रवणादि ष्वनधिकारा त्तेषां तत्वनिर्णयो न भविष्यतीति भावः ।

अथ त्रैवर्णिकानामपि न केवलं वेदान्तश्रवणमात्रेण तत्वनिर्णय- स्सम्भवति, " इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् । बिभेत्यल्पश्रुता द्वेदो मामयं प्रतरिष्यति ॥ " इत्युक्तप्रकारेण वेदार्थस्या प्युपबृंहणमन्तरेण निर्णेतु- मशक्यत्वा दित्याह (वेदानिति) वेदान् - ऋग्यजुस्सामाथर्वण भेदभिन्नान् अनन्तशाखान्, आपाततः परस्परविरुद्धार्थतया प्रतीयमानान् , अपौरुषेया न्, वेदाख्यानक्षरराशीन् । उपबृंहयन् - स्पष्टार्थीकुर्वन् । उपबृंहणं नाम - अर्थविशदीकरणं । तथाच त्रैवर्णिकानामपि वेदार्थविशदीकरणायो पबृंहण स्यापेक्षितत्वा द्रामायण प्रणयनं कवे स्सार्थकमेवेति भावः ।

ननु - सन्दिग्धार्थकस्थले श्रुत्यर्थनिर्णयस्योपबृंहणसापेक्षत्वे प्यसन्दिग्धा र्थकस्थले तदभावा दुपबृंहणमन्तरेणापि तत्वनिर्णयो भविष्यतीत्यत्राह (श्रुति शिरोगूढमिति) श्रुतिपूर्वभागस्य कर्मकाण्डरूपस्य भगवदाराधनात्मक नि- त्यनैमित्तिक कर्मप्रतिपादनैदम्पर्येण प्रवृत्ततया तत्र तत्वस्य दुर्ग्रहत्वेपि उपनिषद्भागस्य ब्रह्मकाण्डात्मकस्य ब्रह्मनिरूपणैकपरतया तत्रैव स्फुटं तत्व प्रतिपत्तिर्भविष्यतीति शंकानिरासाय (शिरइति) " गूढ " मित्यनेन वेदा

न्तभागस्य ब्रह्मनिरूपणैकपरत्वे प्यापाततः परस्परविरुद्धतया प्रतीयमानानां बहूनां वाक्याना मिद मित्थ मित्यर्थनिर्णयस्या सर्वज्ञै रस्मदादिभिः कर्तुमशक्य तया परिश्रमान्वेषणीयत्वं द्योत्यते। तथाचोपबृंहणमन्तरा तदर्थनिर्णयस्या-शक्यत्वा त्तस्य सप्रयोजनत्व मिति भावः।

ननु - चिदचिदीश्वरभेदभिन्नेषु कस्य पुन रत्र तत्वस्य निर्णयः क्रि-यते ? यन्निर्णयाल्लोकाना मुद्धरणं स्यात्, तत्राह (शुभैकास्पदमिति) शुभै कास्पदं - कर्मब्रह्मोभयभावनारहितं योगयुजोध्येयं शुभाश्रयभूतं परं ब्रह्म। सनकसनन्दन विधिशिवादीनां भावनात्रयान्वया दशुभाश्रयत्वं ब्रह्मणएव शुभाश्रयत्वंच श्रीविष्णुपुराणे षष्ठेंशे सप्तमेध्याये प्रपंचितम् —

" त्रिविधा भावना भूप विश्वमेत न्निबोधताम्।
ब्रह्माख्या कर्मसंज्ञाच तथाचैवोभयात्मिका ॥ ४८ ॥
कर्मभावात्मिका ह्येका ब्रह्मभावात्मिका परा।
उभयात्मिका तथैवान्या त्रिविधा भावभावना ॥ ४९ ॥
सनन्दनादयो येतु ब्रह्मभावनया युताः।
कर्मभावनया चान्ये देवाद्याः स्थावरावराः ॥ ५० ॥
हिरण्यगर्भादिषुच ब्रह्मकर्मात्मिका द्विधा।
बोधाधिकारयुक्तेषु विद्यते भावभावना ॥ ५१ ॥ "

इति,

" तद्रूपं विश्वरूपस्य तस्य योगयुजा नृप।
चिन्त्य मात्मविशुद्ध्यर्थं सर्वकिल्बिषनाशनम् ॥ ७३ ॥
यथा ग्निरुद्धताशिखः कक्षं दहति सानिलः।
तथा चित्तस्थितो विष्णु र्योगिनां सर्वकिल्बिषम् ॥ ७४ ॥
तस्मा त्समस्तशक्तीना माधारे तत्र चेतसः।
कुर्वीत संस्थितिं सातु विज्ञेया शुद्धधारणा ॥ ७५ ॥

शुभाश्रय स्सचित्तस्य सर्वगस्याचलात्मनः ।
त्रिभावभावनातीतो मुक्तये योगिनो नृप ॥ ७६ ॥
अन्येतु पुरुषव्याघ्र चेतसो ये व्यपाश्रयाः ।
अशुद्धास्ते समस्तास्तु देवाद्याः कर्मयो नयः ॥ ७७ ॥ "

— इतिच ।

अत एवच भगवता शौनकेनापि ब्रह्मभिन्नानां सर्वेषामेवा शुभाश्रयत्वा त्सामान्यतो ध्येयत्वाभावः प्रत्यपादि-

" आब्रह्मस्तम्बपर्यन्ता जगदन्त र्व्यवस्थिताः ।
प्राणिनः कमजानत [ताः] संसारवशवर्तिनः ॥
यत स्ततो नते ध्याने ध्यानिना मुपकारकाः ।
अविद्यान्तर्गता स्सर्वे तेहि संसारगोचराः ॥ "

— इति ।

तथाच ध्यानोपकारकशुभाश्रयीभूततत्वनिर्णयस्य ध्यानाद्युपयोगित्वेन तन्निर्णयफलकस्या स्य सार्थकतेति भावः ।

निश्चिनुतेस्म - निरचिनोत् । ननु रामायणे दशरथतनयस्य रामचन्द्रस्यैव चरितवर्णना त्कथ मत्र तत्वनिर्णयः क्रियत इत्युच्यत इत्यत्राह (रामवपुषमिति) तथाच रामरूपेणावतीर्णं लक्ष्मीपतिरूपं वस्त्वेव शुभाश्रयभूतं परं ब्रह्मे त्यत्र निर्णीयमानत्वा त्तदीयचरितकथनमपि तदुपयोगायैव भवतीति भावः । अत्र श्रीपतिं शुभैकास्पदं तत्वं निश्चिनुतेस्मेति वा, शुभैकास्पदं तत्वं श्रीपतिं निश्चिनुतेस्मेतिवा, यथायोग मन्वयो बोध्यः । उभयथापि न विवक्षितार्थहानि रित्यवधेयम् ।

विष्णुरेव रामात्मनावतीर्ण इत्यय मंशश्च रामायणएव स्पष्टः । यथोक्तं तत्र बालकाण्डे —

" पुत्रत्वन्तु गते विष्णौ राज्ञस्तस्य महात्मनः । "

" प्रोद्यमाने जगन्नाथं सर्वलोकनमस्कृतम् ।
कौसल्या जनय द्रामं सर्वलक्षणसंयुतम् ॥
विष्णो रर्धं महाभागं पुत्र मैक्ष्वाकवर्धनम् । "
इत्यादि ॥ १ ॥

इत्थं सामान्यतो रामायणे वाल्मीकिना श्रीमा न्रामात्मना वतीर्णो नारायणएव परं तत्वमिति निर्णीयत इति प्रतिज्ञाय, कै र्हेतुभि र्वाल्मीकिः परं ब्रह्म नारायणएवेति निश्चिनोति - कथंचायमर्थो वगम्यते - इत्यपेक्षा यां तदेवोपपादयितु मारभते " तत्रादा " वित्यादिभिः । तत्र बालकाण्डे एकोनत्रिंशसर्गं पूर्वभागार्थं संगृह्णाति श्लोकद्वयेन ।

तत्रादौ बालकाण्डे निरुपधिकमहादीप्तिमत्वा त्सुरेश-
ब्रह्मेशानाद्यमर्त्यै र्दशरथयजने संगतै र्वन्दितत्वात् ।
तैरेवाभिष्टुतत्वा च्छरणवरणत स्सर्वलोकाधिपत्वा
द्वैकुण्ठाधीश्वरत्वा त्सरसिजनयनत्वाच्च पीताम्बरत्वात् ॥२॥

" आदा " वित्येकोनत्रिंशसर्गा त्पूर्वःकृत्स्नोपि भागः परिगृह्यते, चतुर्थश्लोके " एकोनत्रिंशसर्गे " इति तत्सर्गोक्तार्थस्य प्रत्येकं संगृह्यमाण त्वात् । " निरुपधिकमहादीप्तिमत्त्वा " दित्यादयोष्टाविंशतिसर्गेषु वाल्मीक्युक्ता-नां विष्णोः परब्रह्मत्वसाधकानां हेतूनां प्रतिपादकाः ।

तत्राय माद्यो हेतुः " निरुपधिकमहादीप्तिमत्वात् " इति । निरतिश्र यानुपाधिक दीप्तिमत्त्वा दित्यर्थः । निरतिशयदीप्तिमत्वंच परब्रह्मासाधारणो धर्मः । छान्दोग्ये तृतीयप्रपाठके त्रयोदशेखण्डे -

" अथ यदतः परो दिवो ज्योति र्दीप्यते विश्वतः प्रष्ठेषु
सर्वतः प्रष्ठेष्वनुत्तमेषूत्तमेषु लोकेषु "

इत्यादि मन्त्रे ब्रह्मणो निरतिशय दीप्तिमत्त्व प्रतिपादनात् ।

नच शारीरके ज्योतिरधिकरणे - "अथ यदतः परो दिवो ज्योतिर्दीप्यत" इत्यत्र ज्योतिश्शब्दाभिहितं निरतिशयदीप्तियुक्तं वस्तु किं प्रसिद्ध मादित्यादि ज्योतिरेव, उत ततोन्यत्परंब्रह्मेति संशय्य ज्योतिश्शब्दाभिधेयस्यैव "पादोस्यसर्वा भूतानि" इति सर्वभूतचरणत्वाभिधाना त्प्रसिद्धादित्यादि ज्योतिर्विलक्षण मन्य देव परंब्रह्मेति सिद्धान्तितत्वा न निरतिशयदीप्तिमत्त्वं परब्रह्मासाधारणं, निरतिशयदीप्तिमत्त्वस्य परब्रह्मासाधारणधर्मत्वे तावतैव ज्योतिश्शब्दाभिधे यस्य प्रसिद्धादित्यादि ज्योतिरन्यत्वनिश्चयसम्भवेन तस्य प्रसिद्धादित्यादि-ज्योतिष्ट्वसंशयानुपपत्तेरिति वाच्यम् ; निरतिशयदीप्तिमत्त्वस्य परब्रह्मासाधार णत्वेपि तादृशनिरतिशयदीप्तियुक्तं परंब्रह्म किं प्रसिद्ध मादित्यादिज्योतिरेव उत ततोन्यदिति व्यक्तिसन्देहेन तन्निवृत्त्यर्थतया तादृशाधिकरणस्य प्रवृत्तत्वात्।

तथाच भाष्यम् —

" तत्र संशयः - किमयं ज्योतिश्शब्देन निर्दिष्टो निरतिशय दीप्तियुक्तोर्थः प्रसिद्ध मादित्यादिज्योतिरेव कारणभूतं ब्रह्म, उत समस्त चिदचिद्वस्तु जात विसजातीयः परमकारणभूतो-ऽमितभा स्सर्वज्ञ स्सत्यसंकल्पः पुरुषोत्तम इति । "

— इति ।

अत्रच निरतिशयदीप्तियुक्त ब्रह्मविशेष्यकादित्यादि प्रसिद्धज्योतिरभिन्नत्व तद्भिन्नत्वकोटिक स्संशयो विवक्षितः, नतु निरतिशयदीप्तियुक्त वस्तुविशे ष्यक आदित्याद्यभिन्नत्व तद्भिन्न ब्रह्माभिन्नत्व कोटिकः, उक्तवाक्येन तथाविधसंशयालाभात् । तथासति हि- 'निरतिशयदीप्तियुक्तोर्थः प्रसिद्ध मादित्यादिज्योतिरेव, उतपरं ब्रह्म' इति संशयाकारस्स्यात् । निरतिशय दीप्तिमत्त्वंहि कारणत्वाक्षेपकं लिंगं, " न तत्र सूर्यो भाति " इत्यादिनिरतिशय दीप्तिमत्त्व प्रतिपादनप्रकरणे " तथाक्षरात्सम्भवतीह विश्व " मिति निरतिशय

दीप्तियुक्तस्य कारणत्वश्रवणात् । तच्चासाधारणं ब्रह्मणो लिंगम्। अतश्च निरतिशयदीप्तिमत्त्वेन प्रकृतेपि ब्रह्मत्वे निश्चितेपि तादृशब्रह्मणः प्रसिद्धादि-त्यादि ज्योतिरभिन्नत्व तद्भिन्नत्वकोटिकसंशयेनोक्ताधिकरणप्रवृत्ति र्युक्ता।

सर्वमिदं स्पष्टं श्रुतप्रकाशिकायाम् -

" निरतिशदीप्तिरेव कारणत्वाक्षेपकं लिंगम् , " नतत्र सूर्यो भाति " " तस्य भासा सर्वमिदं विभाति " इति प्रकरणे " तथाक्षरात्सम्भवतीह विश्व " मिति निरतिशयदीप्तियुक्त स्य वस्तुनः कारणत्वश्रवणात्। तत्प्रकरणस्य कारणविष यत्वं ह्यविगीतम्। परमात्मविषयत्वेहि विमतिः। निरति शयदीप्तियोगा त्कारणभूतं ब्रह्मभवन् ज्योतिश्शब्दनिर्दिष्टोर्थः किं प्रसिद्ध मादित्यादिज्योतिरेवे त्यन्वयार्थः।"

इति ।

अत्र " निरतिशयदीप्तियोगा त्कारणभूतं ब्रह्म भवन् ज्योति श्शब्दनि-र्दिष्टो र्थ " इति संशयधर्मिनिर्देशः। " किं प्रसिद्ध मादित्यादिज्योति रेवे " ति संशयीयैककोटिनिर्देशः। कोट्यन्तरंच, 'उत ततो न्यः कश्चि' दित्यर्थलभ्यम् ; तथाच पूर्वोक्तसंशयाकारलाभः । तस्मा न्निरतिशयदीप्तिमत्त्वस्य परब्रह्मासाधारण त्वे नकोपि दोषः ।

एवम् —

" यस्मा दर्वा क्संवत्सरो होभिः परिवर्तते ।
तं देवा ज्योतिषां ज्योति रायुर्होपासते मृतम् ॥ "

इति बृहदारण्यके षष्ठाध्यायें चतुर्थब्राह्मणे षोडशें मन्त्रे ब्रह्मणो " ज्यो-तिषां ज्योति " रिति निरतिशयदीप्तिमत्त्वेन निखिलावभासकावभासकत्वेन च प्रतिपादना न्निरतिशयदीप्तिमत्त्वं परब्रह्मासाधारणो धर्मः । तत्रहि ज्योतिश्शब्दो

निरतिशयदीप्तिमद्वाचको ब्रह्मैवाभिदधातीत्यविवादम् । अत एव मध्वाधिकरणे "ज्योतिषि भावाच्च" इति ब्रह्मणो ज्योतिश्शब्देन निर्देशोपि संगच्छते ।

एवं कठवल्ल्यां द्वितीयाध्याये -

"न तत्र सूर्यो भाति न चन्द्रतारकं
नेमा विद्युतो भान्ति कुतोय मग्निः ।
तमेव भान्त मनुभाति सर्वं
तस्य भासा सर्वं मिदं विभाति ॥"

इत्यस्मि न्मन्त्रे ब्रह्मणो निरतिशयदीप्तिमत्त्वं सकलेतरतेजःपदार्थानुग्राहकत्वं च प्रत्यपादि । तथा मुण्डकोपनिषदि द्वितीयमुण्डके द्वितीयखण्डे उक्ताकार एव मन्त्र श्श्रूयते । सोपि ब्रह्मणो निरतिशयदीप्तिमत्त्वप्रतिपादकः । एवं "परं ज्योति" रित्यादयोपि निर्देशा श्श्रुतिगता स्सन्ति ।

"यदादित्यगतं तेजो जगद्भासयतेखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥"

इति भगवद्गीतावचन मप्यत्र प्रमाणम् ।

तदेतादृशं परब्रह्मासाधारणं निरतिशयदीप्तिमत्त्व मत्र पंचदशे सर्गे—

"एतस्मि न्नन्तरे विष्णु रुपयातो महाद्युतिः ।"

इति विष्णोः प्रतिपाद्यमानं तस्य परब्रह्मतामेव साधयति ।

"दशरथ यजने"- दशरथस्य-राज्ञः, यजने पुत्रकामेष्टौ, यागशालायामिति यावत् । "संगतैः" - सम्मिळितैः । यागीयहविर्भागग्रहणार्थं यागशाला मागतै रित्यर्थः । "सुरेशब्रह्मेशानाद्यमर्त्यैः" - सुरेशः - देवेन्द्रः, ब्रह्मा - चतुर्मुखः, ईशानः- शंभुः, एतदाद्यैः - एतत्प्रमुखैः, अमर्त्यैः - देवैः । ब्रह्म रुद्र शचीपति प्रभृतिभि रमरै रित्यर्थः । "वन्दितत्वात्" - नमस्कृतत्वात् । "वदि, अभिवादनस्तुत्यो"

रिति वदे स्तुत्यर्थकताया अपि सत्त्वेपि अत्राभिवादनरूपो र्थएव विवक्षितः, उत्तरत्र " तै रेवाभिष्टुतत्वा " दिति स्तुतेः पृथगुपात्तत्वात् । तथाच ब्रह्म रुद्र शचीपतिप्रभृति सर्वदेवनमस्कृतत्वादिति हेतुः फलितः । अयंच हेतु स्तत्रैव –

" एतस्मि न्नन्तरे विष्णु रुपयातो महाद्युतिः ।
शंखचक्रगदापाणिः पीतवासा जगत्पतिः ॥ १६ ॥
ब्रह्मणा च समागम्य तत्र तस्थौ समाहितः ।
त मब्रुव न्सुरा स्सर्वे समभिष्टूयसन्नताः ॥ १७ ॥

इत्यत्रोक्तः । " सन्नताः " - सम्यङ् नताः, प्रणता इत्यर्थः ।

यद्यपि – "त मब्रुवन् सुरा स्सर्वे " इति सामान्यत एवोक्तत्वा द्ब्रह्मेशान शचीपतीनां विशिष्य प्रणतत्वं न लभ्यते; तथापि –

" ततो देवा स्सगन्धर्वा स्सिद्धाश्च परमर्षयः ।
भागप्रतिग्रहार्थं वै समवेता यथाविधि ॥ ४ ॥ "

इति यागीयहविर्भागग्रहणार्थं समागतत्वेन प्रक्रान्तानां सर्वेषामेव देवानाम्

" ता स्समेत्य यथा न्यायं तस्मिन् सदसि देवताः ।
अब्रुवन् लोककर्तारं ब्रह्माणं वचनं महत् ॥ ५ ॥ "

इति चतुराननसन्निधौ रावणवधोपायप्रार्थनावगमात्, तेषु शचीपते रपि घटकत्वावगमात्, देवगणप्रार्थितेन भगवता नारायणेन तेभ्योऽभयप्रदानसमये-

" एव मुक्तस्तु देवेशो विष्णु स्त्रिदशपुङ्गवः ।
पितामहपुरोगांस्तान् सर्वलोकनमस्कृतः ॥
अब्रवी त्त्रिदशान् सर्वान् समेतान् धर्मसंहितान् ॥ २६ ॥ "

इति चतुर्मुखप्रभृती न्प्रति प्रत्युत्तरकथनावगमेन पूर्वं विज्ञापनकर्तृषु चतुर्मुखस्याप्यन्तर्गतत्वलाभात्, भगवता रावणवधे प्रतिज्ञाते सति –

" ततो देवा स्सगन्धर्वा स्सरुद्रा स्साप्सरो गणाः ।
स्तुतिभि र्दिव्यरूपाभि स्तुष्टुवु र्मधुसूदनम् ॥ "

इति रावणवधप्रतिज्ञासन्तुष्टेषु भगवत्स्तुतिकर्तृषु रुद्रस्यान्तर्गतत्वकथनेन पूर्वं विज्ञापनदशायामपि तस्य विज्ञापनकर्तृदेवगणमध्यपतितत्वावगमाच्च, ब्रह्म शिवशचीपतीनां भगवन्नमनकर्तृत्वं लभ्यत एवेति "सुरेशब्रह्मेशानाद्यमर्त्यै र्दशरथ यजने संगतै र्वन्दितत्वादि " ति साधु संगच्छते ।

अयंच हेतु र्ब्रह्मशिवादिभ्यः परत्वं साधय न्नर्था द्विष्णोः सर्वस्मा त्परत्वं साधयति । तथाहि -

सर्वस्मा त्परत्वं हि स्वेतरनिखिलचेतनाचेतनोत्कृष्टत्वम् । तत्राचेतना पेक्षया चेतनानां परत्वंच सर्वसम्मतम् । चेतनेष्वपि सुरनरतिर्यगादिभेदभिन्नेषु तिर्यगाद्यपेक्षया नराणां, तत स्सुराणांच श्रेष्ठतमत्वे न कस्यचिद्विवादः । सुरेष्वप्य ग्नियमादिभ्यो देवेन्द्रस्य, तत स्त्रिमूर्तीनां ब्रह्मविष्णुरुद्ररूपाणा मुत्तमत्वंच न कस्यापि विप्रतिपन्नम् । तेषु ब्रह्मविष्णुरुद्ररूपेषु कस्य परत्व मित्येवास्ति काचन विप्रतिपत्तिः । तत्र ब्रह्मरुद्रापेक्षया विष्णोः परत्वे सिद्धे सर्वस्मा त्परत्वमपि सिद्ध मेव । एवंच सकलदेवगणश्रेष्ठाभ्यां ब्रह्मरुद्राभ्यां विष्णो र्वन्दितत्वरूपोयं हेतु रर्था द्विष्णो स्सर्वस्मा त्परत्वमेव साधयतीति ।

"तैः" - पूर्वोक्तै र्ब्रह्मरुद्रशचीपतिप्रभृतिभि र्देवै रेव । "अभिष्टुतत्वात्" - अभितः स्तुतत्वात् । ब्रह्मरुद्रादिसर्वदेवगणस्तुतत्वादिति फलितो हेतुः । अयमपि पूर्वहेतुवदेव भगवतस्सर्वस्मा त्परत्वं साधयति ।

बालकाण्डे पंचदशसर्गे -

" तमब्रुव न्सुरा स्सर्वे समभिष्टूय सन्नताः । "

इति सर्वदेवकर्तृक भगवत्स्तुति रभिहिता । " समभिष्टूय " सम्यक्स्तुत्वा । स्तोत्रस्य सम्यक्त्वंच भक्तिपुरस्कृतत्वं । सभक्तिभरं स्तुत्वेत्यर्थः । अथवासम्यक्त्वं

यथार्थगुण कथनरूपत्वं, देवतान्तरविषयक स्तुतीनामारोपिताऽसदन्यदीय गुण कथनरूपत्वा द्भगवत्स्तुते र्वर्तमानयथार्थगुण कथनरूपत्वाच्च तयोर्वैलक्षण्यात् ।

" शरणवरणतः " - शरणमितिवरणं - शरणवरणं - उपायवरणं, तस्मात्- उपायत्वेन वृतत्वादित्यर्थः । " तै " रित्यनुषज्यते । ब्रह्मरुद्रादिभि रुपायत्वेन स्वीकृतत्वादिति यावत् । शरणशब्दस्य गृहादिसाधारण्येपि प्रसिद्धि प्राचुर्यादुपायवाचकत्वं मुख्यम् । यद्वा तस्य नानार्थकत्वे प्यत्र उपायार्थक त्वएव तात्पर्यात्तस्यैव बोधः ।

तथाच तत्रैव काण्डे तस्मिन्नेव सर्गे भगवन्तंप्रति देवानां वचनम्—

" सहि देवांश्च गन्धर्वां स्सिद्धांश्च मुनिसत्तमान् ।
राक्षसो रावणो मूर्खो वीर्योत्सेकेन बाधते ॥
ऋषयश्च तत स्तेन गन्धर्वाप्सरस स्तथा ।
क्रीडन्तो नन्दनवने क्रूरेण किल हिंसिताः ॥
वधार्थं वय मायाता स्तस्य वैमुनिभि स्सह ।
सिद्धगन्धर्वयक्षाश्च तत स्त्वां शरणं गताः ॥ "

— इति ।

अत्रहि रावणवधकामानां ब्रह्मादीनां देवानां तद्वधाय भगवच्छरणागतिः प्रतिपाद्यते ।

यद्यपि - देवानामियं शरणागती रावणवधमात्रफला, अत्र प्रतिपाद्य मानं शरणत्वंच रावणवधोपायत्वरूपं, इति नास्य भगवदसाधारण्यम् ;

" यो ब्रह्माणं विदधातिपूर्वं योवैवेदांश्च प्रहिणोति तस्मै ।
तंहदेव मात्मबुद्धिप्रसादं मुमुक्षुर्वै शरणमहं प्रपद्ये ॥ "

इत्युक्त मुमुक्षुकर्तृक भगवत्प्राप्तिफलक शरणागतेः -

" एषसेतु विधरण एषां लोकाना मसम्भेदाय । "
" नाय मात्मा प्रवचनेन लभ्यो न मेधयानबहुना श्रुतेन ।
यमेवैष वृणुते तेन लभ्य स्तस्यैष आत्मा विवृणुते तनूंस्वाम् । "

इत्यादि श्रुतिस्मृत्युक्त मोक्षोपायत्वस्यच भगवदसाधारण्येपि फलान्तरोद्देश्यक कामिकर्तृकशरणवरणस्य फलान्तरोपायत्वस्यच देवतान्तरेष्वपि सम्भवात ; अतएव - पराधिकरणे - " उपपत्तेश्च " इति सूत्रेण भगवतो मोक्षोपायत्वमेवा साधारणं वर्णितम् ।

तथापि ब्रह्मरुद्रादिनिखिलदेवकर्तृकं देवतान्तरासाध्य रावणवधफलकं शरणवरणमपि तस्य सर्वस्मात्परत्वं साधयत्येव । शरणागतापेक्षया शरण्यस्य परताया स्सर्वसम्प्रतिपन्नतया सर्वेषामेव देवाना मत्र शरणागततया शरण्यस्य भगवत स्सर्वेभ्यो देवेभ्यः परतायां विवादासम्भवेन सिद्ध्यतः परत्वस्य सर्वस्मात्परत्वएव पूर्वोक्तरीत्या पर्यवसानात् । अत्र प्रतिपाद्यमानाच शरणागतिः-

" ततो देवा स्सगन्धर्वा स्सिद्धाश्च परमर्षयः ।
भागप्रतिग्रहार्थंवै समवेता यथाविधि ॥ "

इत्युपक्रमे भागप्रतिग्रहार्थ मागतत्वेनोक्तानां सर्वेषामेव देवानाम् —

" तमब्रुवन् सुरा स्सर्वे समभिष्टूयसन्नताः । "

इति भगवत्सन्निधौ सप्रणामं प्रार्थनवर्णनात्, मध्येच-

" वधार्थं वय मायाता स्तस्य वैमुनिभि स्सह ।
सिद्धगन्धर्वयक्षाश्च ततस्त्वां शरणं गताः ॥ २३ ॥ "

इति देववाक्यानन्तरं -

" एवमुक्तस्तु देवेशो विष्णु स्त्रिदशपुंगवः ।
पितामहपुरोगां स्तां स्सर्वलोकनमस्कृतः ॥ "

इति भगवता ब्रह्मादीनुद्दिश्य प्रत्युत्तरदानप्रतिपादनात् ; अन्तेच -

" ततो देवा स्सगन्धर्वा स्सरुद्रा स्साप्सरोगणाः ।
स्तुतिभि र्दिव्यरूपाभिः स्तुष्टुवु र्मधुसूधनम् ॥ "

इति भगवत्कृत रावणवधप्रतिज्ञासन्तुष्टानां सरुद्राणां देवानां भगवत्सुतिकरण प्रतिपादनाच्च, ब्रह्मरुद्रादिसर्वदेवकर्तृके त्यवगम्यते । रावणवधरूपंचेदं फलं देवतान्तरासाध्यमित्यय मंशश्च -

" अवध्यं देवतै र्विष्णो समरे जहि रावणम् ॥ "

इति देववचना दवगतः । अतएवच -

" त्वं गतिःपरमादेव सर्वेषां नः परन्तप । "

इति सर्वेषां देवानां भगवदेकोपायत्वं प्रतिपाद्यमानं संगच्छते ।

" सर्वलोकाधिपत्वात् " - सर्वेषां, लोकानां - भुवनानां, अधिपत्वात् - निरुपाधिकस्वामित्वात । निरुपाधिकसर्वजग त्स्वामित्वादिति फलितो हेतुः ।

कौषीतकी ब्राह्मणोपनिषदि - तृतीयाध्याये -

" एषलोकपाल एषलोकाधिपति रेषलोकेश्वरः । "

इति ब्रह्मणो साधारणतया लोकाधिपतित्वं श्रुतम् । बृहदारण्यकेच षष्ठाध्याये चतुर्थब्राह्मणे-

" सर्वस्य वशी सर्वस्येशान स्सर्वस्याधिपतिः "
" एष सर्वेश्वर एषभूताधिपति रेषभूतपालः । "

इति ब्रह्मणः पर्यायशब्देन लोकाधिपतित्वं, असंकोचात्तस्य सर्वाधिपतित्वं च श्रुतम् । तदिदं सर्वलोकाधिपत्व मत्र -

" एतस्मिन्नन्तरे विष्णु रुपयातो महाद्युतिः ।
शंखचक्रगदापाणिः पीतवासा ज[illegible]तिः ॥ "

इति विष्णोः प्रतिपाद्यमानं तस्य परब्रह्मतां साधयति । जगत्पतित्वं हि ब्रह्मणो साधारणो धर्मः । अतएव शारीरके प्रथमाध्याय तृतीयपादे ऽर्थान्तरत्वादि व्यपदेशाधिकरणे -

" आकाशोहवै नामरूपयो र्निर्वहिता ते यदन्तरा तद्ब्रह्म तदमृतं सआत्मा "

इत्यत्रा काशशब्दनिर्दिष्टो मुक्तात्मा - उतपरमात्मा इति संशय्य, मुक्तात्मेति पूर्वपक्षमुपन्यस्य, नामरूपनिर्वोढृत्वश्रवणा दाकाशशब्दनिर्दिष्टः परमात्मैवेति " आकाशोर्थान्तरत्वादिव्यपदेशात् । " इति सूत्रेण सिद्धान्तयित्वा; ततश्च प्रत्यगात्मातिरिक्तस्या त्मनएव कस्यचिदभावा दाकाशशब्दनिर्दिष्टो न प्रत्यगात्मातिरिक्त इति पुनः पूर्वपक्षान्तर मुपस्थाप्य, " सुषुप्त्युत्क्रान्त्यो र्भेदेन । " इति सूत्रेण सुषुप्त्युत्क्रान्त्योः —

" प्राज्ञेनात्मना सम्परिष्वक्तो नबाह्यं किञ्चन वेदनान्तरम् । "
" प्राज्ञेनात्मना न्वारूढ उत्सर्जन्याति । "

इति प्रत्यगात्मनः परिष्वंगान्वारोहश्रवणा त्परिष्वज्य परिष्वंजकयोर्भेदेन व्यपदेशा त्प्रत्यगात्मनोतिरिक्तः परमात्मा स्त्येवेति सिद्धान्तयित्वा; हेत्वन्तरेणापि प्रत्यगात्मनो र्थान्तरभूतं परमात्मानं साधयन् सूत्रकारः -"पत्यादिशब्देभ्यः । " इति सूत्रे जगत्पतित्वमपि परमात्मनो साधारणं धर्मं निर्दिशति ।

तथाच तत्र भाष्यम् -

" अयं परिष्वञ्जकः परमात्मोत्तरत्र पत्यादिशब्दै र्व्यपदिश्यते - 'सर्वस्याधिपति स्सर्वस्यवशी सर्वस्येशानः । " ' सनसा धुना कर्मणाभूया न्नो एवा साधुना कनीयान् ' 'एष सर्वेश्वर एष भूताधिपति रेष भूतपाल एष सेतुर्विधरण एषां लोकाना मसम्भेदाय, ' ' तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति । एतमेव विदित्वा मुनिर्भवति । एतमेव प्रव्राजिनो लोक मिच्छन्तः प्रव्रजन्ति, सएवा एष महानज आत्मा

न्नादोवसुदानोऽ जरोमृतोभयो ब्रह्मे ' ति ! एते च पति त्व जगद्विधरणत्वसर्वेश्वरत्वादयः प्रत्यगात्मनि मुक्तावस्थेपि न कथंचि त्सम्भवन्ति । "

— इति ।

जगत्पतित्वं चेद मन्यत्रापि -

" पतिं विश्वस्यात्मेश्वरं शाश्वतँ शिव मच्युतम् ।
नारायणं महाज्ञेयं विश्वात्मानं परायणम् ॥ "
" वैकुण्ठेतु परे लोके श्रिया सार्धं जगत्पतिः ।
आस्ते विष्णु रचिन्त्यात्मा भक्तै र्भागवतै स्सह ॥ "

इत्यादिश्रुतिस्मृतिषु भगवतः प्रतिपाद्यते । तथा चायं जगत्पतित्वरूपो हेतु र्विष्णोः परब्रह्मतां साधयत्येवेति सिद्धम् ।

" वैकुण्टाधीश्वरत्वात् " - वैकुण्ठस्य - तन्नाम्नः प्रकृतिमण्डल मति क्रान्तस्य मुक्तप्राप्यस्य परमव्योमशब्दाभिधेयस्य लोकविशेषस्य, अधीश्वरत्वात् - स्वामित्वात् । अयं च वैकुण्ठलोकस्वामित्वरूपो हेतु र्मोक्षप्रदत्वरूपेण ब्रह्मणो साधारणेन धर्मविशेषेण व्याप्त स्त्वाश्रयस्य परब्रह्मतां गमयति । मोक्षस्य वैकुण्ठ प्राप्तिगर्भतया तत्स्वामिन मन्तरा तत्प्रदत्वस्या न्यत्रासम्भवा द्वैकुण्ठस्वामित्वं मोक्षप्रदत्वेन व्याप्तम् ।

" तमेव हत्वा सबलं सबान्धवं
विरावणं रावण मग्र्यपौरुषम् ।
स्वलोक [स्वर्लोक] मागच्छ गतज्वर श्चिरं
सुरेन्द्र ! गुप्तं गतदोषकल्मषम् ॥ "

इत्यत्र मोक्षस्वामित्वरूपोयं हेतु रुक्तः । अय मर्थः — हे सुरेन्द्र! सुराणां - नित्यसूरीणां, इन्द्र - स्वामिन् । गतानि, दोषाः - रागद्वेषादयः, त एव कल्मषानि यस्मात्, तादृशम् । गुप्तं - देवदानवादिभि र्दुरधिगमं, " अत्य र्कानलदीप्तं तत्स्थानं विष्णो र्महात्मनः । स्वयैव प्रभया राजन् दुष्प्रेक्ष्यं देव

दानवैः ॥ " इत्युक्तरीत्या देवदानवादिभि र्द्रष्टु मप्यशक्य मित्यर्थः । स्वलोकं - निजं लोकम् , वैकुण्ठलोक मित्यर्थः । आगच्छ - निवर्तस्वेत्यर्थः ।

" स्वलोक " मित्यनेनोक्तो लोकश्च परमपदपरन्धामपरमाकाशादि शब्दितो वैकुण्ठलोकः, " तद्विष्णोः परमं पदम् " इत्यादि श्रुतिस्मृतिभिः परमपदाख्यवैकुण्ठलोकस्य भगवदीयत्वप्रतिपादनात् । स्वस्य लोक इति व्युत्पत्त्याच स्वलोकशब्दो लोकशब्दोक्तवैकुण्ठस्य स्वामित्वं प्रतिपादयति ।

" स्वर्लोक " मिति पाठेपि स्वर्लोकशब्दस्य वैकुण्ठपरतया तस्य भगवत्स्वामिकताया श्श्रुत्यन्तर प्रतिपन्नतया, ' गुप्त ' मित्यत्र त्वये त्यध्याहाराच्च तत्र भगवतो वैकुण्ठस्वामित्व प्रतीति र्बोद्ध्या । " सुरेन्द्रगुप्त " मित्यस्यैकपदत्वे तस्य स्वर्लोक विशेषणतया, तदानीं सुरेन्द्रशब्दस्य भगवत्परतया तद्गुप्तत्व कथनेन तत्स्वामित्व मर्थसिद्धम् , सुरेन्द्रशब्दस्य विष्वक्सेनपरत्वे च विष्वक्सेन कर्तृकगोपनस्य भगव ल्लोकमन्तरान्यत्रा प्रसिद्धतया तस्य लोकस्य भगवत्स्वामिकत्व मर्थापत्ति सिद्धमिति च ज्ञेयम् ।

नच - स्वर्गशब्दस्य प्रसिद्धेन्द्र लोकएव प्रसिद्धेः, "सुरेन्द्रगुप्त"मित्यस्य स्वर्लोकविशेषणत्वेन तद्घटकसुरेन्द्रशब्दस्य शचीपतावेव प्रचुरप्रयोगा च्छचीपतिगुप्तत्वस्य प्रसिद्धेन्द्रलोकएव सम्भवाच्च नात्र वैकुण्ठलोक प्रतीतिरिति वाच्यम् । " स्वर्लोक " शब्दस्य प्रसिद्धेन्द्रलोकपरत्वे इन्द्रलोकं प्रत्येव भगवतः पुनरागमनस्य दैवैः प्रार्थितत्व लाभेन तस्य च प्रमाणान्तर विरुद्धत्वेनासंगत्या पातात् ।

श्रीरामायणार्थ संक्षेपरूपे बालकाण्ड प्रथमसर्गेहि —

" अश्वमेध शतैरिष्ट्वा तथा बहुसुवर्णकैः ।
गवां कोट्ययुत न्दत्वा ब्रह्मलोकं गमिष्यति ॥ "

इति नारदेना नागत दर्शिना रामात्मनावतीर्णस्य विष्णो र्ब्रह्मलोक गामित्व मेव वर्णितम् । ब्रह्मलोकश्च परब्रह्मलोक भूतो मुक्तप्राप्यो वैकुण्ठलोकएव, नतु चतुर्मुखलोकः, चतुर्मुखलोकंप्रति विष्णोर्गमनस्य सन्दर्भे विरुद्धत्वात् । ब्रह्मलोकशब्दश्च न शचीपति लोकवाची , रूढिग्राहक प्रचुरप्रयोग कोशादे रभावात् , योगार्थस्य ब्रह्मसम्बन्धित्वस्य तत्र सर्वात्मनाप्य सम्भवाच्च ।

नच- रामात्मनावतीर्णस्य भगवतो वैकुण्ठलोकगामित्वावश्यकत्वेपि स्वर्लोकशब्दस्य प्रचुरप्रयोगकोशादे श्शक्तिग्राहकस्याभावेन कथं वैकुण्ठलोकपरत्वमिति वाच्यं; स्वर्गशब्दस्य लौकिक प्रचुरप्रयोगेण शचीपति लोकवाचित्ववत् वैदिक प्रयोगबलेन वैकुण्ठलोकवाचिताया अपि निष्प्रत्यूहं सिद्धि सम्भवात् ।

स्वर्गशब्दश्च वेदेषु बहुशो भगवल्लोकपरतया दृश्यते । तत्र तावत् तैत्तिरीयारण्यके प्रथमप्रपाठके सप्तविंशेनुवाके —

> " देवानां पूरयोध्या । तस्याँ हिरण्मयः कोशः । स्वर्गो लोको ज्योतिषावृतः । यो वै तां ब्रह्मणो वेद । अमृतेनावृतां पुरीम् । तस्मै ब्रह्म च ब्रह्मा च । आयुः कीर्तिं प्रजां ददुः । "

इति मन्त्रे स्वर्गशब्दो भगवल्लोकपरो दृश्यते । अत्र हि " स्वर्गो लोको ज्योतिषावृतः । " इत्यनेन प्रतिपाद्यमान स्स्वर्गलोकः - " अत्यर्कानलदीप्तं तत्स्थानं विष्णो र्महात्मनः । " इत्याद्युक्तनिरतिशयदीप्तियुक्त वैकुण्ठाख्यभगवल्लोक एव, उत्तरत्र " विवेशा पराजिता " इति तल्लोकवर्तिनः स्थानविशेषस्यापराजिता संज्ञाप्रतिपादनात् । " तस्य हवा एतस्य ब्रह्मलोकस्यारोहृदो मुहूर्तान्येष्ठिहा विरजानदीह्वो वृक्ष स्सालज्जं संस्थान मपराजित मायतनम् । " इति कौषीतकी ब्राह्मणोपनिषदि ब्रह्मलोकवर्तिनः स्थानविशेषस्यैवा पराजितसंज्ञाव गमात् । " यो वै तां ब्रह्मणो वेद । " इति पूर्वप्रस्तुतस्य स्वर्गलोकस्य ब्रह्म स्वामिकत्वकथनात् । तस्य प्रसिद्धेन्द्रलोके ऽसम्भवा च ।

एवं तलवकाराणां केनोपनिषदि चतुर्थखण्डे —

" योवा एता मेवं वेदा पहत्य पाप्मान मनन्ते स्वर्गे लोके ज्येये प्रतितिष्ठति प्रतितिष्ठति । "

इति मन्त्रेपि स्वर्गशब्दो भगवल्लोकपरो दृश्यते । अत्र च " अपहत्य पाप्मानं " इति सर्वपापविधूननपूर्वकं तल्लोकप्राप्तिकथनात् , " अनन्त " इति अपुनरावृत्तिरूपकालपरिच्छेदराहित्यश्रवणात्, " ज्येये " इति सर्वोत्तरत्वश्रवणा च स्वर्गशब्दो भगवल्लोकपर एव; प्रसिद्धेन्द्रलोकरूपे स्वर्गे उक्तधर्माणा मनुपपन्नत्वात् ।

एवं कठोपनिषदि प्रथमवल्ल्याम् —

" स्वर्गे लोके नभयं किंचनास्ति न तत्र त्वं न जरया बिभेति ।
उभे तीर्त्वा अशनाया पिपासे शोकातिगो मोदते स्वर्गलोके ॥"

इति द्वादशमन्त्रे स्वर्गशब्दो भगवल्लोकपरः प्रयुक्तः । तत्र स्वर्गलोके सर्वविध भयराहित्यप्रतिपादना त्तत्र वर्तमानानां जराराहित्यवर्णनात् अशनाया पिपासादिराहित्यशोकातिगत्वादिप्रतिपादना च स्वर्गलोकशब्दस्य प्रसिद्धेन्द्रलोकपरत्वासम्भवात् ।

तस्यामेव वल्ल्यां —

" सत्वमग्निं स्वर्ग्यमध्येषि मृत्यो प्रब्रूहितं श्रद्दधानायमह्यम् ।
स्वर्गलोका अमृतत्वं भजन्त एतद्द्वितीयेन वृणे वरेण ॥ "

इति त्रयोदशेमन्त्रेपि स्वर्गशब्दो भगवल्लोकपरतया दृष्टः । " स्वर्गलोका अमृतत्वं भजन्त " इति स्वर्गलोकगताना ममृतत्वप्राप्तिवर्णनेनात्र स्वर्गशब्दस्य भगवल्लोकपरत्वा वश्यकत्वात् ।

एवं तस्यामेववल्ल्यां —

" त्रिणाचिकेतस्त्रयमेतद्विदित्वा यएवंविद्वांश्चिनुतेनाचिकेतं ।
समृत्युपाशान्पुरतःप्रणोद्य शोकातिगो मोदते स्वर्गलोके ॥ "

इत्यष्टादशमन्त्रेपि स्वर्गशब्दो भगवल्लोकपरोदृश्यते । " समृत्युपाशान्पुरतः प्रणोद्य " इतिस्वर्गलोकस्य रागद्वेषादि सर्वकल्मष विनिर्मोकानन्तर प्राप्यतावगमात् , " शोकातिगः " इति तत्र वर्तमानस्य शोकातिगत्वावगमाच्च ।

एवं बृहदारण्यके —

" तेनधीरा अपियन्ति ब्रह्मविद स्स्वर्गं लोकमित ऊर्ध्वा विमुक्ताः । "

इति मन्त्रेपि भगवल्लोके स्वर्गशब्दःप्रयुक्तः । तत्र " तेनधीरा अपियन्ति ब्रह्मविदःस्वर्गं " इति स्वर्गशब्दवाच्यस्य ब्रह्मवित्प्राप्यत्व कथनात् ," इत ऊर्ध्वा विमुक्ता " इति मुक्तप्राप्यत्व वर्णनाच्च ।

तदेव मुभयोरेव भगवल्लोक शचीपतिलोकयोः स्वर्गशब्दस्य प्रयोगेऽविशिष्टे शचीपतिलोके परं शक्ति रन्यत्रनेत्यत्र नियामकाभावा त्तस्योभयोरेव शक्तत्वावश्यकतया ऽत्र स्वर्लोकशब्देन भगवल्लोकप्रतीति र्निष्प्रत्यूहैव ।

वस्तुतस्तु - स्वर्गशब्दो भगवल्लोकएवमुख्यः, " यन्नदुःखेनसम्भिन्नं " इत्याद्युक्तस्वर्गशब्दप्रवृत्तिनिमित्तस्य भगवल्लोकएवा संकोचं वृत्तेः । प्रसिद्धेन्द्र लोकरूपे स्वर्गेहि —

" स्वर्गेपि पातभीतस्य क्षयिष्णो नास्ति निर्वृतिः । "

इत्युक्तप्रकारेण पातभीतिजन्यदुःखस्यावर्जनीयतया दुःखासम्भिन्न सुखसन्तानावहत्वरूप स्वर्गशब्दप्रवृत्तिनिमित्तस्य सर्वथाप्यसम्भवएव । भगवल्लोकश्च " नोपज

नं स्मरन्निदं शरीरं " इत्याद्युक्तप्रकारेण दुःखासम्भिन्नसुखसन्तानावह इत्यविप्रतिपन्नम् ।

तस्मात् - " स्वर्लोकमागच्छ गतज्वरश्चिरम् " इतिपाठेपि वैकुण्ठाधिपतित्व प्रतीति र्निष्प्रत्यूहैवेति तेन विष्णोः परत्वसाधनं युज्यतएवेति सिद्धम् ।

(सरसिजनयनत्वादिति) अत्र सरसिजशब्द स्तात्पर्यवृत्त्या पुण्डरीके वर्तते । तथाच पुण्डरीकाक्षत्वादितिफलितो हेतुः ।

पुण्डरीकाक्षत्वंच ब्रह्मणोऽसाधारणोधर्मः । तथाच श्रूयते छान्दोग्यप्रथम प्रपाठके षष्टखण्डे —

" तस्य यथा कप्यासं पुण्डरीकमेव मक्षिणी तस्योदितिनाम सएष सर्वेभ्यः पाप्मभ्य उदित उदेतिहवै सर्वेभ्यः पाप्मभ्यो य एवं वेद । "

— इति ।

अस्या श्च श्रुते रय मर्थः — तस्य - आदित्यमण्डलान्तर्वर्तिनः परम पुरुषस्य । अक्षिणी - नेत्रे । कप्यासं - कं - जलं पिबतीति कपि स्सूर्यः तेन, अस्यते - क्षिप्यते - विकास्यत, इति कप्यासं - सूर्यविकासितं; रविकरविकसित मित्यर्थः । यद्वा - कं - जलं, पिबतीति कपि - नाळं, तस्मिन्नास्त इति कप्यासं - नाळस्थम् ; अनपचित मित्यर्थः । अथवा - के - जले अप्यास्त इति कप्यासं - जलस्थम् । पुण्डरीकं - रक्ताम्भोजम् । यथा - यादृशप्रकारविशिष्टम् । एवं - एतादृशप्रकारविशिष्टे । रविकरविकसितेन नाळस्थेना नपचिते नाम्भस्सम्भूतेन रक्तांबुजेन तुल्ये इति यावत् । तस्य - परमपुरुषस्य । उदिति नाम - " उत् " इत्याकारको वाचक श्शब्दः । उन्नामकत्वे हेतुः " स एष "

इत्यादिनोच्यते । स एषः - परमपुरुषः । सर्वेभ्यः - समस्तेभ्यः । पाप्मभ्यः - पुण्यपापेभ्यः । उदितः - उद्गतः, तत्सम्बन्धरहित इत्यर्थः; अपहतपाप्मेति यावत् । सर्वपापोद्गतत्वा दुन्नामकत्वं भगवतइत्यर्थः । यः - चेतनः । एवं वेद- एतादृशज्ञानवा न्भवति । सः । सर्वेभ्यः । पाप्मभ्यः - पुण्यपापेभ्यः । अलौकिकानिष्टफलसाधनस्यैव पापशब्दवाच्यतया मुमुक्षूणा मैहिकामुष्मिकैश्वर्यादि फलकपुण्यस्याप्यनिष्टफलप्रदत्वेन पापरूपत्वा त्पुण्यस्यापि पापवत् ' पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैती ' त्यादिषु विहेयताश्रवणाच्च, तस्यापि पापशब्दवाच्यत्व मुपपन्नम् । उदेति - उद्गच्छति, तत्सम्बन्धरहितो भवतीत्यर्थः । अत्र चादित्यमण्डलान्तर्वर्तिनः परमपुरुषस्य मुमुक्षूपास्यस्य मोक्षप्रदस्य पुण्डरीकाक्षत्व मसाधारणधर्मतया श्रुतम् । ' क श्री श्रियः परमसत्वसमाश्रयः कः कः पुण्डरीकनयनः पुरुषोत्तमः कः ' इति ह्यनुगृह्णन्ति भगवद्यामुनमुनिमिश्राः ।

तदिदम्परस्य ब्रह्मणो ऽसाधारणं पुण्डरीकाक्षत्वम् बालकाण्डे पंचदशे सर्गे —

" ततः पद्मपलाशाक्षः कृत्वात्मानं चतुर्विधम् ।
पितरं रोचयामास तदा दशरथं नृपम् ॥ "

इति श्लोके विष्णो रसाधारणतया कथ्यमानं विष्णोः परब्रह्मतां गमयति ।

" पीतांबरत्वात् "— पीतं - पीतवर्णं, अम्बरं, यस्यस पीतांबरः, तत्त्वात् ।

पीताम्बरत्वं च ब्रह्मणोऽसाधारणो धर्मः । तथा च श्रूयते बृहदारण्यके चतुर्थाध्याये पंचमब्राह्मणे —

" तस्य हैतस्य पुरुषस्य रूपं यथा माहारजनं वासो यथा पाण्डूविकं यथेन्द्रगोपो यथाग्न्यर्चि र्यथा पुण्डरीकम् । "

— इति ।

अस्या श्च श्रुते रय मर्थः — तस्यैतस्य - मूर्तामूर्तात्मकरूपविशिष्टस्य, समस्तचिदचिच्छरीरकस्येत्यर्थः । पुरुषस्य - पुरुषशब्दवाच्यस्य ब्रह्मणः । रूपम् - दिव्यमंगळविग्रहः । यथा माहारजनं - महारजनं कुसुम्भपुष्पं, तेन रक्तं - माहारजनं - कुसुम्भपष्पवर्णेन रक्त मित्यर्थः: कौसुम्भवर्णं वस्त्रादिक मिव । तथाच भगवतः कौसुम्भवर्णो दिव्यमंगळविग्रहो प्यस्तीति भावः । वासः - वस्त्रम् । तस्यैतस्येत्यत्राप्यन्वेति । भगवतो वस्त्रमित्यर्थः । यथा पाण्ड्वाविकं - पाण्डरवर्णः कम्बळ इव, तत्समानवर्ण मित्यर्थः । यथेन्द्रगोपः - शक्रगोपकृमि रिव, तत्समानवर्ण मित्यर्थः । यथाग्न्यर्चिः - अग्निज्वालेव । यथा पुण्डरीकं - रक्ताम्भोज मिव । अत्र च ' तस्यैतस्य वासो यथा पाण्ड्वाविकं, तस्यैतस्य वासो यथेन्द्रगोपः ' इत्येवं पुनः पुन र्वास श्शब्दावृत्तौ पाण्डरकम्बळसवर्ण मेकं वासः, इन्द्रगोपसमानवर्ण मपरं, अग्निज्वालासरूप मेकं, पुण्डरीकसवर्ण मेकं चेति विभिन्नवर्णवस्त्रचतुष्टयसिद्धिः । तदनावृत्तौ च एकस्यैव वस्त्रस्य नानावस्तुसादृश्यकथनेन चित्रवर्णत्वसिद्धि श्च बोध्या ।

अथवा — तस्यैतस्य पुरुषस्य रूपं वास श्च - दिव्यमंगळविग्रहो वस्त्रं चेत्युभयम् । यथा माहारजनं - माहारजनसदृशम् । यथा पाण्ड्वाविकं - पाण्डरवर्णकम्बळसदृशम् । एव मुत्तरत्रापि । अत्र च माहाराजन मित्यस्य कौसुम्भवर्णं वस्त्वेवार्थः । यथा माहारजन मित्यनेन कौसुम्भवर्णवस्तुसादृश्यं रूपस्य वाससश्च बोध्यते । यद्यप्यत्र रूपस्येव वाससो प्युद्देश्यत्वा त्तद्वाचकस्य पदस्य विधेय वाचका त्पूर्वं पाठ आवश्यकः, तथापि पाठक्रमस्या विवक्षितत्वा त्परत्र स्थित स्यापि वासश्शब्दस्या न्वयानुरोधेन पूर्वं मनुषंगसम्भवा च्च न मात्रयापि विवक्षितार्थलाभे बाधकं किंचित् ।

यद्यपीयं श्रुति र्वेदार्थसंग्रहे भगवता भाष्यकारेण भगवद्दिव्यरूपपरतयो दाहृतेति, श्रीभाष्ये तृतीयाध्याय द्वितीयपादे उभयलिंगाधिकरणे " तस्य हवा एतस्य पुरुषस्य रूपं यथा माहारजनंवास इत्यादिना कारविशेष ञ्चाभिधाय " इतिग्रन्थेन दिव्यरूपपरत्वमेवचास्या श्रुते र्वर्णितमिति, तदनुसारेण चान्यै राचार्यैरपि दिव्यरूपपरतयैवेयं योजिताचेतिच, काममस्याः केवल दिव्यविग्रहपरतयैव व्याख्यानं युक्तं । तथापि वेदार्थसंग्रहतात्पर्यदीपिकायां "स्वानुरूपपीताम्बर धरः " इति वेदार्थसंग्रहवाक्यं व्याचक्षाणै श्श्रुतप्रकाशिकाचार्यैः " (स्वानुरूप पीताम्बरधरइति) - ' तस्यमाहारजनं वासः ' इतिश्रुतिः । " इति पीताम्बर परतयास्या श्श्रुते रुदाहृतत्वा दस्माभि रस्याश्श्रुते र्दिव्यरूप पीताम्बरोभयपरतयापूर्वं व्याख्यातत्वेन भगवद्भाष्यकारग्रन्थ संगते श्चोपदर्शितार्थपरत्वं संगच्छत एव । तत्र वेदार्थसंग्रहतात्पर्यदीपिकाग्रन्थे पूर्वोदाहृते " तस्य माहारजनं वासः " इति श्रुतिः " इतिकथयद्भि श्श्रुतप्रकाशिकाचार्यै श्श्रुतिघटकस्य तस्येत्यस्य पदस्य पदान्तरव्यवहितस्यापि वास इत्यत्रानुषंग स्सूचितः ।

नचास्या श्श्रुते र्दिव्यविग्रह वस्त्रोभयविधायकत्वे वाक्यभेद प्रसंगइति वाच्यं, तादृशविचित्रवर्णदिव्यपीताम्बरविशिष्ट दिव्यविग्रहविधायकत्वाश्रयणेन विशिष्टविधितया वाक्यभेदप्रसंगाभावात् । अंगीकृतोहि पूर्वमीमांसा प्रथमाध्याय तृतीयपादे " तद्गुणास्तु विधीयेर न्नविभागा द्विधानार्थे नचेदन्येनशिष्टाः " इत्यत्र विशिष्टविधिर्जैमिनिना । तत्रहि "यदाग्नेयोष्टाकपाल " इत्यादयः किं गुणविधय उतकर्मनामधेयानीति संशय्य, गुणविधित्वे ऽग्निपुरोडाशाष्टाकपालानां बहूनां गुणानां विधेयत्वावश्यम्भावेन वाक्यभेदप्रसंगान्न गुणविधयइति पूर्वपक्षमुपक्षिप्य, कर्मणो गुणानां चाप्राप्तत्वेन अनेकगुणविशिष्टैककर्मविधित्व माश्रितम् । भगवता च भाष्यकृता वेदार्थसंग्रहे " तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः " इत्यस्याः श्श्रुतेः सदादर्शनवत्सूरिविशिष्टपरमपदविधिपरत्व माश्रितम् । इत्थं चात्रापि चित्रवर्णा प्राकृतवस्त्रविशेषविशिष्ट दिव्यरूपविशेषविधिपरत्व मुपपद्यत एव ।

नचैवं – " यथा माहारजनं " " यथा पाण्ड्वाविकं " " यथेन्द्रगोपो यथाग्नयर्चि र्यथापुण्डरीक " मित्युपमानपंचककथना त्कौसुम्भवर्ण मेकं पाण्ड्वाविकतुल्य मपरं, इन्द्रगोपसदृश मितरत्, अग्निज्वालासदृश मितरत्, पुण्डरीकाकार मन्यच्चेति वस्त्रपंचकलाभा देकैकवस्त्रविशिष्टरूपपंचकविधानपरत्वावश्यकतया वाक्यभेदप्रसंगो दुर्वार एवेति वाच्यम् । अस्या श्श्रुतेः केवलरूपमात्रविधिपरत्वांगीकारे प्युक्तरीत्या रूपपंचकविधिपरत्वावश्यंभावेन वाक्यभेदस्य तत्कल्पेपि तुल्यतया ऽगत्या समाश्रयणीयत्वात् । एकस्मिन्नेव वस्तुनि नानावस्तुसादृश्यकथनमुखेन चित्रवर्णताप्रतिपादनस्यैव तात्पर्यविषयत्वसम्भवेन चित्रवर्णैकवस्त्रविशिष्टैकदिव्यरूपविधानपरत्वाश्रयणस्यापि सम्भवेन तत्कल्पे वाक्यभेदप्रसंगाभावाच्च ।

तस्मा दस्या श्श्रुते र्दिव्यरूपव द्दिव्यवस्त्रस्यापि विधायकत्वसम्भवेन इन्द्रगोपाग्निज्वालादिसदृशस्य वस्त्रस्यैव पीताम्बरत्वेन पीताम्बरत्व मिदं श्रुतिप्रतिपन्नं ब्रह्मणोऽसाधारणो धर्म इति सिद्धम् ।

तदिदं ब्रह्मणोऽसाधारणं पीताम्बरत्वं श्रीरामायणे बालकाण्डे पंचदशसर्गे -

" एतस्मि न्नन्तरे विष्णु रुपयातो महाद्युतिः ।
शंखचक्रगदापाणिः पीतवासा जगत्पतिः ॥ "

इत्यस्मिन् श्लोके विष्णोः प्रतिपाद्यमानं तस्य परब्रह्मत्व मवगमयति ।

देवेभ्यो ऽभीतिदाना द्वरवितरणत स्सर्वलोकै र्नुतत्वा
त्सर्वांतर्यामिभावा दनितरसुलभा च्चापिनारायणत्वात् ।
देवेशत्वाव्ययत्व द्रुहिणहरशुनासीर मुख्यामरौघ
प्रत्यक्षान्तर्धिभि श्चाप्यचकथत परं ब्रह्म विष्णुं मुनीन्द्रः॥

(देवेभ्य इति) देवेभ्यः - ब्रह्मरुद्रशचीपतिप्रभृतिभ्यः सर्वेभ्योपि सुरेभ्यः। अभीतिदानात् - अभयप्रदानात् । ब्रह्मरुद्रादिसर्वदेवाभयप्रदातृत्वरूपोयं हेतु र्विष्णो स्सर्वस्मात्परत्वसाधकः । इद मत्राकूतं, लोकेहि सामान्यतो ऽभयदानं भीतेभ्य स्तदीयभयनिवारणशक्तै रेव क्रियमाणं दृष्टं, भयं च स्वाशक्यनिवार णेभ्य आपदादिभ्यो जन्यते । एवंच तदशक्यनिवारणेभ्य आपदादिभ्य स्तस्य रक्षकेन तदपेक्षयातिशयितशक्तिमता भाव्यम् । अन्यथा तस्येवास्या प्याप न्निवारणाक्षमत्वेनाभयदानासम्भवात् । तदपेक्षयातिशयितशक्तिकश्च तस्मा दुत्कृष्ट एव भवति । इत्थं च ब्रह्मादिसकलगीर्वाणगणाभयदातु र्भगवतो विष्णो स्तदपेक्षया ऽतिशयितशक्तिमत्त्वस्या वश्यकतया सकलदेवाभयदातृत्व रूपोयं हेतु र्विष्णो स्सर्वदेवोत्कृष्टत्वं साधयन् तत एव सर्वस्मा त्परत्व मेव साधयतीति ।

नच - तत्तदपेक्षया परिमितशक्तिनापि पुरुषेण तात्कालिकभयजन्य दुःखनिवारणाभिप्रायेण प्रतारणाय वाऽभयदानसम्भवा न्नेद मतिशयितशक्तिमत्त्व व्याप्तमिति वाच्यम् । स्वन्यूनशक्तिना स्वसमानशक्तिना वा पुरुषेण भयं ते निवारयिष्यामीत्युक्तेपि निरूपकस्य भयनिवृत्त्यदर्शनात् । भयनिवृत्तिजनकस्या भयदानस्या तिशयितशक्तिमत्त्वव्याप्यत्वसम्भवात् ।

तदिदं सर्वदेवेभ्यो ऽभयदानं श्रीरामायणे बालकाण्डे पंचदशसर्गे —

" एव मुक्तस्तु देवेशो विष्णु स्त्रिदशपुंगवः ।
पितामहपुरोगां स्तां स्सर्वलोकनमस्कृतः ॥
अब्रवीत् त्रिदशान् सर्वा स्समेतान् धर्मसंहितान् ।
भयं त्यजत भद्रं वो हितार्थं युधि रावणम् ॥ "

इत्यादिषु विष्णोः प्रत्यपादि । अत्र च " अब्रवीं त्रिदशां स्सर्वा " नित्यत्र सर्वशब्देन कण्ठत उक्ता अनुक्ताश्च देवाः कृत्स्नाः परिगृह्यन्ते । ब्रह्मरुद्रादीनां तदटकत्वं च " पितामहपुरोगां स्ता " नित्यनेनोदाहृतश्लोकघटकवाक्येन,

" ततो देवा स्सगन्धर्वा स्सरुद्रा " इत्येतच्छ्लोकोत्तरश्लोकघटकेनान्यैश्च स्पष्ट मुपलभ्यते ।

भगवत्कृतेनाभयदानेन देवानां भयनिवृत्ति र्जाते त्यय मंशश्चाभयदान तुष्टै र्देवैः

" ततो देवा स्सगन्धर्वा स्सरुद्रा स्साप्सरो गणाः ।
स्तुतिभि र्दिव्यरूपाभि स्तुष्टुवु र्मधुसूदनम् ॥ "

इत्यत्र भगवत्स्तुतिकरणदर्शनेन,

" त्वं गतिः परमादेव सर्वेषां नः परं तप । "

इत्यत्र देवानां भगवत्यतिशयितशक्तिमत्तानिश्चयनिबन्धनविश्वासातिशय प्रतिपादन दर्शनेन चावगन्तुं शक्यते ।

तस्मा द्धेतु रयं भगवतो विष्णो स्सर्वस्मा त्परत्वसाधने प्रभवत्येवेति सुष्ठूक्तं " देवेभ्यो भीतिदाना " दिति ।

" वरवितरणतः " — वरस्य, वितरणं - दानं, तस्मात् - वरप्रदानात् । अत्रापि " देवेभ्य " इत्यनुषज्यते । तथाच ब्रह्मरुद्रादिभ्य स्सकलदेवेभ्यो वर प्रदाना दित्यर्थः । अत्रापि वरदात्रपेक्षया तत्प्रतिग्रहीतु रपकृष्टताया लोक न्यायसिद्धतया हेतो रस्य पूर्वहेतुनिरूपणावसरोक्तयुक्तिभि र्विष्णुपरत्वसाधकत्व मवसेयम् ।

अत्र वरदानस्याभयदानरूपत्वे तत्पर्यायत्वेपि वा पृथगुपादानं वरदान त्वेन वरदानस्य झटिति परत्वबुद्धिसम्पादकतया बोद्धव्यम् ।

" युगकोटिसहस्राणि विष्णु माराद्ध्य पद्मभूः ।
पुन स्त्रैलोक्यधातृत्वं प्राप्तवानिति शुश्रुम ॥ "

" महादेव स्स्वर्वमेधे महात्मा हुत्वात्मानं देवदेवो बभूव । "

इत्यादिषु ब्रह्मरुद्रादिकर्तृकस्य नारायणकर्मकस्योपासनस्य नारायणकर्तृकस्य ब्रह्मरुद्रादिसम्प्रदानकस्य वरप्रदानादिरूपानुग्रहस्यच सर्वतः प्रतिपादनेन वर प्रदस्योत्तमत्वप्रसादनीयत्वादिकं, वरग्रहीतु रुपासकत्वनिहीनत्वप्रसादयितृत्वा दिकं, च निर्विवादपण्डितमात्रसंप्रतिपन्नम् ।

इदं च वरदानम् —

" एवं दत्वा वरं देवो देवानां विष्णु रात्मवान् । "

इति तत्सर्गगते ऽ भयदानप्रतिपादकश्लोकोत्तरश्लोक एव प्रतिपादितम् ।

" सर्वलोकै र्नुतत्वात् " — सर्वै र्लोकैः - देवमनुष्यादिरूपैः, नुतत्वात् । सर्वलोकनुतत्वरूपो यमपि हेतुः पूर्वोक्तहेतुद्वयव त्सर्वस्मा त्परत्वसाधक एव । समाधिकदरिद्रत्वं चानेन सूच्यते, अन्यथा सर्वनुतत्वासम्भवात् । नहि समो धिकोवा कश्चित् स्तुवन् दृश्यते । इदं च सर्वलोकनमस्कृतत्वं —

" पितामहपुरोगां स्तान् सर्वलोकनमस्कृतः । "

इति पूर्वोदाहृतश्लोके प्रतिपादितम् ।

" सर्वान्तर्यामिभावात् " — सर्वेषां - चेतनाचेतनात्मकानां, अन्तर्यामि भावात् - अन्तर्यामित्वात्, अन्तः प्रविश्य नियमनकर्तृत्वात् । सकलजगदन्त र्यामित्वा दिति फलितो हेतुः ।

सकलजगदन्तर्यामित्वं च ब्रह्मणो साधारणो धर्मः । तथाहि —

बृहदारण्यके पंचमाध्याये सप्तमब्राह्मणे षोडशे खण्डे श्रूयते —

" यः पृथिव्यां तिष्ठन्पृथिव्या अन्तरो यं पृथिवीनवेद यस्य पृथिवी शरीरं यः पृथिवी मन्तरोयमयत्येषत आत्मान्तर्याम्यमृतः ।"

इत्यारभ्य, " योविज्ञानेतिष्ठ न्विज्ञानादन्तरो यं विज्ञानं नवेदयस्यविज्ञानं शरीरं योविज्ञानमन्तरोयमय त्येषत आत्मान्तर्याम्यमृतः । योरेतसितिष्ठन् रेतसोन्तरो यं रेतोनवेद यस्य रेतश्शरीरं यो रेतोन्तरोयमय त्येषत आत्मान्तर्याम्यमृतो ऽदृष्टोद्रष्टा ऽ श्रुत श्श्रोता ऽमतो मन्ता ऽ विज्ञातो विज्ञाता नान्योतोस्ति द्रष्टाना न्योतोस्ति श्रोता नान्योतोस्ति मन्ता नान्योतोस्ति विज्ञातैषत आत्मान्तर्याम्यमृतः । "

— इत्यन्तम् ।

अत्र च पृथिव्यप्तेजोन्तरिक्ष वाय्वादि सकलचेतनाचेतनान्तर्गतत्वान्तः प्रविश्यनियमनादिकं ब्रह्मणो साधारणधर्मतया " पृथिव्या अन्तरो " " यः पृथिवीमन्तरोयमयति " " अद्भ्योन्तरः " " योपामन्तरोयमयति " इत्यादि वाक्यैः प्रतिपाद्यते । एतादृश श्चान्तः प्रविश्यनियमनकर्ता न जीवोपितु पर मात्मैवेत्ययमंशः प्रतिपर्याय मधीयमानेन निरुपाधिकानन्याधीनामृतत्व प्रति पादकेनामृतशब्देन स्फुटीकृतः । अन्ततश्च " अदृष्टोद्रष्टा ऽ श्रुतश्श्रोता " इत्यादिना अदृष्टत्वादि सहचरित निरुपाधिककरणानधीनद्रष्टृत्वादि प्रति पादकेनायमर्थोदृढीकृतः ।

तथा तैत्तिरीयारण्यके तृतीयप्रश्ने एकादशेनुवाके—

" अन्तः प्रविष्टश्शास्ता जनानाम् । "

इति,

" अन्तः प्रविष्टश्शास्ता जनानां सर्वात्मा । "

इति च ब्रह्मणो साधारणधर्मतया सर्वान्तरात्मत्वं श्रुतं । एवं " तत्सृष्ट्वा तदेवानुप्राविश " दित्यादिष्वपीदमन्तरात्मत्वं ब्रह्मधर्मतया श्रूयते ।

नचान्तर्यामित्वस्य परमात्मा साधारणधर्मत्वे ऽ न्तर्याम्यधिकरणासंगतिः, अन्तर्यामित्वस्य परब्रह्मा साधारणस्य जीवसाधारण्यासम्भवेन काण्वै र्माध्यं दिनैश्च वाजसनेयिभि रधीयमानेषु " यः पृथिव्यां तिष्ठन् " इत्यादिवाक्येषु श्रूयमाणोन्तर्यामी प्रत्यगात्मा उतपरमात्मेति संशयासम्भवेन तन्निराकरणपर स्याधिकरणस्य प्रवृत्त्यसम्भवात् । तत्र ह्येवं भाष्यम् —

" काण्वामाध्यंदिनाश्च वाजसनेयिन स्समामनन्ति - 'यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो ..... आत्मान्तर्याम्य मृत' इति । एव मग्ग्वग्नयन्तरिक्षवाय्वादित्य दिग्चन्द्र तारकाकाशतमस्तेजस्सु ..... इत्युपदिश्यते । माध्यं दिनपाठेतु 'य स्सर्वेषु लोकेषु तिष्ठन्' 'य स्सर्वेषु वेदेषु' 'य स्सर्वेषु यज्ञेष्वि' तिच पर्यायाः । 'यो विज्ञाने तिष्ठन्नि' त्यस्य पर्यायस्य स्थाने 'य आत्मनि तिष्ठन्नि' ति पर्यायः । 'सत आत्मान्तर्याम्यमृत' इति च विशेषः । तत्र संशय्यते - किमय मन्तर्यामी प्रत्यगात्मा - उत पर मात्मेति । किं युक्तं ? प्रत्यगात्मेति । कुतः ? वाक्यशेषे 'द्रष्टा श्रोते' ति करणायत्तज्ञानताश्रुतेः, एवंद्रष्टु रेषा न्तर्यामित्वोपदेशात्, 'नान्यो तोस्ति द्रष्टे' ति द्रष्टृन्तर निषेधा च्चेति ।"

— इति ।

अत्र च " यः पृथिव्यां तिष्ठ " न्नित्यादि ष्वन्तर्यामितया श्रुतस्य प्रत्य गात्मत्वपरमात्मत्वसन्देह एवो क्ताधिकरणारम्भमूल मिति, तत्र चान्तर्यामित्वस्य प्रत्यगात्मपरमात्मोभयसाधारण्य मिति च सुगम मेव, इति वाच्यम् । उक्ताधि करणस्य प्रत्यगात्मत्वपरमात्मत्वसन्देहनिराकरणार्थतया प्रवृत्तत्वेपि चेतनाचेतना त्मकसकलजगदन्तर्यामिणि प्रत्यगात्मत्वपरमात्मत्वसन्देहस्य तदधिकरणमूलत्वा

भावेन सर्वान्तरात्मत्वस्य ब्रह्मासाधारण्ये बाधकाभावात् । तदधिकरणोत्थानमूल भूतोहि सन्देहः काण्व माध्यंदिनवाजसनेय्यधीयमानेषु " यः पृथिव्यां तिष्ठन् " इत्यादिषु श्रूयमाणेन्तर्यामिणि प्रत्यगात्मत्वपरमात्मत्वकोटिक एव, नतु सर्वान्त र्यामिणि, सर्वान्तरात्मत्वरूपपरमात्मत्वस्यैव फलत एतदधिकरणनिर्णेयत्वात् । अत एवहि भाष्ये —" तत्र संशय्यते किमय मन्तर्यामी प्रत्यगात्मा - उत परमात्मा " इति संशयाकारकथनप्रकरणे " अय " मिति संशयीयधर्मिविशे षनिर्देशः परमात्मत्वस्य कोटितया निर्देश श्च संगच्छते ।

इदमत्र बोध्यं - " यः पृथिव्यां तिष्ठ " न्नित्यादि वाक्येषु प्रतिपाद्य मान मन्तर्यामित्वं यदि बाधकाभावा च्चेतनाचेतनात्मक सकलजगदन्तर्यामित्वरूपं, तदात्र प्रतिपाद्यमानोन्तर्यामीपरमात्मैव, जीवस्य पृथिव्याद्यन्तर्यामितायाः कथ ञ्चित्सम्भवेपि जीवांतर्यामित्वासम्भवेन चेतनाचेतनात्मक सकलजगदन्तर्यामित्व स्य तत्र बाधितत्वात् । यदिच सर्वांतर्यामिरूपत्वे बाधकसद्भावा त्पृथिव्याद्यन्त र्यामित्वरूपेणैव पर्यवस्यति, तदातादृशस्य योगमहिमसम्भृत जीवविशेषे सम्भवा दत्र प्रतिपाद्यमानोन्तर्यामी जीवएव भवितु मर्हति । एवंचात्र " यः पृथिव्या " मित्यादिषु श्रूयमाणेन्तर्यामिणि धर्मिणि जीवत्व ब्रह्मत्वसन्देहमूलभूतोन्तर्यामित्वस्य सर्वांतर्यामित्व रूपतासम्भवासम्भवसन्देहइति तादृशसन्देहेनोक्ताधिकरणप्रवृत्तिः।

अत्रच - " यः प्रथिव्या " मित्यादौ श्रूयमाणमन्तर्यामित्वं नचेतना चेतनात्मक सकलजगदन्तर्यामित्वरूपं, अत्रान्तर्यामितया श्रुतस्यैवोत्तरत्र वाक्य शेषे " एषहिद्रष्टाश्रोता " इत्यादिना करणाधीनज्ञानवत्त्वरूपद्रष्टृत्वादि श्रवणेन तस्य सर्वांतर्यामिणिबाधिततया तथात्वासम्भवात् । नच द्रष्टृत्वश्रोतृत्वादीनां रूपादिसाक्षात्कर्तृत्वादिरूपतांगीकारा त्तेषां च परमात्मन्यपि सम्भवा न्नांन्तर्या मित्वस्य सर्वांतर्यामित्वरूपत्वे बाधकमितिवाच्यं, तथासति "नान्योतोस्तिद्रष्टा" इत्यादिना उत्तरत्र द्रष्टृन्तरनिषेधस्या नुपपत्तिः, रूपादिसाक्षात्कर्तृत्वरूपद्रष्टृ त्वस्य जीवब्रह्मसाधारणत्वात् । एवंच " य आत्मनि तिष्ठन् " इत्यस्य

मुख्यत्वासम्भवाद्गौणत्व ममृतत्वादीनां मुख्यानां जीवे बाधिततयाऽ मुख्यत्वं चा श्रयणीयम् । तस्मादत्र प्रतिपाद्यमानोऽन्तर्यामीजीव एवेति पूर्वपक्षे-तन्निराकरणाय " अन्तर्याम्यधिदैवाधिलोकादिषु तद्धर्मव्यपदेशा " दित्य सूत्रयद्भगवान्बादरायणः । अथमर्थः- " अधि दैवाधि लोकादिषु "- अधि दैवाधिलोकादिपद चिह्नितेषु वाक्येषु श्रूयमाणः । अन्तर्यामी । परमात्मा । कुतः ? " तद्धर्मव्यपदेशात् " - परमात्मधर्माणां सर्वलोक सर्वभूत सर्वदेवा द्यन्तर्यामित्व स्वाभाविकामृतत्वादीना मत्र व्यपदेशात् । इति । अत्र च " यः पृथिव्या " मित्यादिषु श्रूयमाणमन्तर्यामित्वं चेतनाचेतनात्मक कृत्स्न जग-दन्तर्यामित्वरूपमेव, " य आत्मनितिष्ठ " न्निति चेतनस्यापि व्याप्यतया निर्देशात् ; " आत्मनी " ति सप्तम्याः " तिष्ठ " न्नित्यस्य च तथात्व एव मुख्यार्थत्व सम्भवात् ; सम्भवति मुख्यार्थत्वे गौणत्वकल्पनायोगात् । नचान्तर्यामिणोद्रष्टृत्वादिनिर्देशो बाधकः, रूपादिसाक्षात्कर्तृत्वादिरूपद्रष्टृत्वा-दीनां परमात्मन्यपिसम्भवेन तस्याबाधकत्वात् । नच तथा सति द्रष्टृन्तर निषेधानुपपत्तिः, परमात्मसजातीय द्रष्टृन्तरस्यैव तत्र निषेध्यतया बाधा भावात् । यथाहि परमात्मा नियाम्यभूतैः पृथिव्यादिभि रदृष्टएव संस्तानन्तः प्रविश्य नियमयन्द्रष्टाभवति न तथा परमात्मनोपि नियामक स्तदन्तः प्रविष्ट स्तेनाप्यदृष्टः कश्चिद्दृष्टास्ति । अतश्च द्रष्टृन्तरनिषेधानुपपत्त्यभावाद्दृष्टृत्वादीनां रूपादिसाक्षात्कर्तृत्वरूपतासम्भवात् " आत्मनितिष्ठ ", न्नित्यादे र्मुख्यार्थ-कत्वे बाधकाभावा दन्तर्यामित्वं सर्वान्तर्यामित्वरूपमेव । एवंचामृतत्वादीनां मुख्यत्वंसम्भवति । तस्मादत्र प्रतिपाद्यमानोऽन्तर्यामी परमात्मैवेति सिद्धान्तः ।

— इति ।

अय मर्थ श्च श्रुतप्रकाशिकाया मेव व्यक्तः । तथा च तत्रत्योग्रन्थः—

" समस्तचेतना चेतनान्तर्यामित्वेन श्रूयमाणस्यापि कथं जीव-त्व शंकोत्थानं ? उच्यते- " द्रष्टाश्रोते " त्यादि शब्देन

करणायत्तज्ञान वत्ताप्रतीतिबला दमृतत्वादिलिंगानां " आ-
त्मनि तिष्ठ " त्रित्यादि व्यतिरेकनिर्देशस्य नियमनस्यचा
मुख्यत्वशंकयाऽधिकरणोत्थानामति । "

— इति ।

तस्मा त्सकलजगदन्तर्यामित्वं परब्रह्मणोऽ साधारणो धर्मएव । तदिदं सकलजगदन्तर्यामित्वं श्रीरामायणे बालकाण्डे पंचदशे सर्गे-

" एतस्मि न्नन्तरे विष्णु रुपयातो महाद्युतिः " ॥ १६ ॥
" त्वां नियोक्ष्यामहे विष्णो लोकानां हित काम्यया "॥१८॥
" विष्णो पुत्रत्व मागच्छ कृत्वात्मानं चतुर्विधम् " ॥ २७ ॥
" एवमुक्त स्ततो देवो विष्णु स्त्रिदश पुंगवः " ॥२६॥
" एवं दत्वा वरं देवो देवानां विष्णुरात्मवान् " ॥ २९ ॥

इत्यादिषु विष्णुशब्देन भगवति प्रतिपाद्यमानं तस्य परब्रह्मतां साधयति । विष्णुशब्दोहि " विषॢ व्याप्तौ " इति, " विशप्रवेशने " इतिवा धातो र्निष्पन्नो नुक्प्रत्ययान्त स्सकलजगद्व्यापकं सकलजगदन्तःप्रविष्टं वा वस्तुब्रूते, धातुवाच्यस्य व्याप्तेः प्रवेशनस्यवा व्याप्यविशेष प्रवेष्टव्य विशेषाकथनेना संकोचा त्सकलजगद्व्याप्तौ सकलजगत्प्रवेशनेवा पर्यवसानात् । एवं योगेन सामान्यत स्सकलचेतनाचेतनात्मक जगद्व्यापकं तदन्तःप्रविष्टंवा वस्तु वद न्नप्ययं विष्णुशब्दो रूढ्या नारायणमेव वदति , प्रचुरप्रयोगकोशादीनां रूढिग्राहकाणां प्रमाणानां तथाविधानां सत्त्वात् ।

" यस्मा द्विष्टमिदं सर्वं तस्य शक्त्या महात्मनः ।
तस्मा द्विष्णु रितिख्यातो विशेर्धातोः प्रवेशनात् ॥ "

इति विष्णुपुराण तृतीयांश प्रथमाध्याय वचनात् ,

" व्याप्ते मे रोदसी पार्थ कान्तिश्चा भ्यधिकास्थिता ।
क्रमणाच्चा प्यहं पार्थ विष्णु रित्यभि संज्ञितः ॥ "

इति शंकरकृत सहस्रनामभाष्यधृतात् महाभारते शान्तिपर्वणि मोक्षधर्म वचनात् ,

" व्याप्य सर्वा निमान् लोकान् स्थित स्सर्वत्र केशवः ।
ततश्च विष्णुनामासि विशेर्धातोः प्रवेशनात् ॥ "

इति भगवद्गुण दर्पणाख्य सहस्रनामभाष्यधृत हरिवंश वचनात् ,

" यस्मा द्विष्ट मिदं सर्वं तस्य शक्त्या महात्मनः ।
तस्मा त्स प्रोच्यते विष्णु र्विशेर्धातोः प्रवेशनात् ॥ "

इत्यादित्य पुराणवचना, दन्यै श्चैवञ्जातीयकै र्विष्णुशब्दस्य पूर्वोक्तार्थकत्वं सुस्पष्टम् ।

इत्थंच योगरूढेन विष्णुशब्देन विष्णौ सकलजगदन्तर्यामित्वस्य ब्रह्मधर्मस्य बोधनं सिद्धमित्यत्र सकलजगदन्तर्यामित्वेन विष्णोः परब्रह्मत्वसाधनं युक्तमेव ।

यद्यपि विष्णुशब्देन सकलजगदन्तर्व्याप्ति स्तत्प्रवेशो वा योगबलाल्लभ्यते, नतु नियमनमपीति, अन्तर्यामित्वस्यान्तःप्रविश्य नियमनरूपस्य नततो योगेन लाभः; तथापि नियमनस्यान्तःप्रवेशादि नियततयाऽन्तः प्रवेशस्य व्याप्तेर्वा कथने नियमन मप्यर्थसिद्ध मित्यन्तर्यामित्वस्यापि लाभस्संभवत्येवेति न दोषः ।

" अन्तःप्रविष्ट श्शास्ता जनानाँ सर्वात्मा । "

इत्यादिभिः श्रुतिस्मृतिभि र्हि नियमनस्यान्तःप्रवेश नियतत्वं लभ्यते ।

अथवा - " सर्वांतर्यामिभावा " दित्यनेन सर्वांतरत्वमात्रमेव विवक्षितं, नतु नियमनमपि । यैरेव श्श्रुतिस्मृतिभिरन्तःप्रविश्य नियमनरूपस्या

न्तर्यामित्वस्य ब्रह्मधर्मतालाभ स्तैरेव सर्वांतरत्वस्यापीति तावन्मात्रस्यैव विष्णोः परब्रह्मतासाधकत्व सम्भवा द्विष्णुशब्देन नियमन पर्यन्तस्या लाभेपि नक्षतिः।

सर्वांतरत्वमात्रस्यापि ब्रह्मधर्मत्वं- बृहदारण्यके पंचमाध्याये चतुर्थब्राह्मणे उषस्त प्रश्न प्रतिवचनरूपे-

" अथचैनमुषस्तश्चाक्रायणः पप्रच्छ याज्ञवल्क्येति होवाच यत्साक्षा दपरोक्षा द्ब्रह्म यआत्मा सर्वांतरस्तन्मे व्याचक्ष्व "

— इत्यादिके,

" एषत आत्मा सर्वान्तरोतोन्यदार्तं ततो होषस्तश्चाक्रायण उपरराम। "

इत्यन्तेपि प्रतिपन्नं, एव मन्यत्रा प्यनुसन्धेयं। तस्मात् " सर्वांतर्यामिभावा " दिति सुष्ठूक्तम्।

इमेच सर्वांतर्यामित्व सर्वांतरत्वे अन्यत्रापि विष्णौ नारायणे प्रतिपाद्येते। तथाच सुबालोपनिषदि सप्तम खण्डे श्रूयते —

" अन्तः शरीरे निहितो गुहाया मज एको नित्यो यस्य पृथिवी शरीरं यःपृथिवीं मन्तरे सञ्चरन्यं पृथिवीनवेद "

— इत्यारभ्य,

" यस्य मृत्यु श्शरीरं यो मृत्युमन्तरे सञ्चरन्यं मृत्युर्नवेद सएष सर्वभूतान्तरात्मा ऽपहतपाप्मा दिव्योदेव एको नारायणः। "

—इत्यन्तम्।

एवं —

" यच्च किञ्चि ज्जगत्यस्मिन् दृश्यते श्रूयतेपि वा।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणःस्थितः॥ "

इत्यादि श्रुतयोपि द्रष्टव्याः।

तथा-

" अहमात्माशुडाकेश सर्वभूताशयस्थितः ।
भ्रामयन् सर्वभूतानि यन्त्रारूढ़ानि मायया ॥ "

इत्यादि स्मृतयो प्यत्रा नुसन्धेयाः ।

(अनितरसुलभादिति) इदं च " सर्वान्तर्यामिभावादि " ति पूर्वत्रवा " नारायणत्वादि " त्युत्तरत्रवा देहळी दीपन्यायेनोभयत्रवा न्वेति । सर्वान्तर्यामित्व नारायणत्वयोरुभयोरेव ब्रह्मान्यधर्मत्वाभावात् ।

" नारायणत्वात् "- नाराः- नित्यवस्तु समूहाः, तेषां अयनत्वात्- आधारत्वात्, उपायत्वात्, उपेयत्वादितिचार्थः । आधारत्वंच स्वरूपस्थिति प्रवृत्तिहेतुत्वं, तच्च ब्रह्मणो ऽसाधारणोधर्मः । तथाहि - तैत्तिरीयारण्यके पंचम प्रश्ने चतुर्दशेनुवाके- श्रूयते-

" तत्सृष्ट्वा, तदेवानुप्राविशत् । तदनुप्रविश्य, सच्च त्यच्चाभवत् । "

— इति ।

अत्र च सत्यच्छब्दादिवाच्य चेतनाचेतनात्मक सकलजगत्स्वरूपस्य भगवदनुप्रवेशमूलतया ब्रह्माधीनता प्रतिपाद्यते ।

एवं बृहदारण्यके पंचमाध्याये ऽ ष्टमे ब्राह्मणे-

" साहोवाच यदूर्ध्वं याज्ञवल्क्य दिवो यदर्वाक्पृथिव्या य दन्तरा द्यावापृथिवी इमेयद्भूतं च भविष्यच्चेत्याचक्षते आकाश एव तदोतं च प्रोतं चेति कस्मिन्नुखल्वाकाश ओतश्च प्रोतश्चेति ॥ ६ ॥ "

इति गार्गिप्रश्नोत्तरतया-

" स होवा चैतद्वैतदक्षरं गार्गि ब्राह्मणा अभिवदन्ति "

इत्यारभ्य, मध्ये

" एतस्य वा अक्षरस्य प्रशासने गार्गिसूर्याचन्द्रमसौ विधृतौ तिष्ठत एतस्य वा अक्षरस्यप्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठतः । एतस्य वा अक्षरस्यप्रशासने गार्गिनिमेषा मुहूर्ता अहोरात्राण्यर्धमासा ऋतव स्संवत्सरा इति विधृता स्तिष्ठन्ति "

इत्याद्युक्त्वा, ततः-

" एतस्मिन्नुखल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेति "

— इति श्रूयते ।

अत्र च त्रैकाल्यवर्ति विकारजातस्या प्याधारतयोक्तस्य भूतसूक्ष्मरूपस्या ऽऽ काशस्याधारभूतः क इति गार्गिप्रश्ने- अक्षरशब्दवाच्ये परस्मिन् ब्रह्मण्याकाशस्यो तत्वप्रोतत्वादिकमुक्त्वा, पूर्वोक्तमाधारत्वं विवृण्वता याज्ञवल्क्येन सूर्या चन्द्रमः प्रभृतीनां भगवत्प्रशासनाधीनधारणवत्त्व कथना द्भगवत स्सकलजगद्धारकत्वं लब्धम्भवति ।

तथा- तैत्तिरीयारण्यके-

" भर्तासन् ध्रियमाणो बिभर्ति "

इति ब्रह्मणस्सकलजगद्भर्तृत्वरूपं सकलजगदाधारत्वमुक्तम् । एवमन्या अपि श्रुतयोत्रानुसन्धेयाः । भगवतः प्रवृत्तिहेतुत्वं च " अन्तः प्रविष्टश्शास्ता जनानां । " इत्यादि श्रुतिस्मृतिसिद्धम् ।

" योलोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः । "
" अहमात्मागुडाकेश सर्वभूताशयस्थितः ।
भ्रामयं त्सर्वभूतानि यन्त्रारूढानि मायया ॥ "

इत्यादिभिश्चायमर्थ स्सुस्पष्टः । एवं च स्वरूपस्थिति प्रवृत्तिहेतुत्वरूपमाधारत्वं ब्रह्मणोसाधारणधर्मइति स्थितम् । उपायत्वमपि ब्रह्मणोसाधारणधर्मएव, श्वेताश्वतरोपनिषदि षष्ठेध्याये-

" योब्रह्माणं विदधातिपूर्वं योवैवेदांश्च प्रहिणोतितस्मै ।
तँहदेव मात्मबुद्धिप्रसादं मुमुक्षुर्वैशरण महंप्रपद्ये ॥ "
" निष्कळं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् ।
अमृतस्य परं सेतुं दग्धेन्धन मिवानलम् ॥ "

इत्यष्टादशै कोन विंशमन्त्रयो ब्रह्मणश्शरण सेतुशब्दाभ्या म्मोक्षोपायत्व प्रतिपादनात् ।

" तमेवशरणं गच्छ सर्वभावेन भारत । "
" सर्वधर्मान्परित्यज्य मामेकंशरणंव्रज ॥ "

इत्यादिषु तथात्वप्रतिपादनाच्च ॥ ब्रह्मणएवोपेयत्वंच " ब्रह्मविदाप्नोति परं " इत्यादि श्रुतिस्मृति सिद्धम् । तदेतादृशं ब्रह्मासाधारणं सकलजगदाधारत्वोपायत्वोपेयत्वरूपं नारायणत्व मत्र रामायणे बालकाण्डे षोडशे सर्गे-

" ततोनारायणोदेवो नियुक्तस्सुरसत्तमैः ।
जानन्नपिसुरानेवं श्लक्ष्णं वचन मब्रवीत् ॥ "

इति श्लोके विष्णुविषयतया प्रयुक्तेन नारायणशब्दे नैकेनैव संगृह्य विष्णोः प्रतिपाद्यमानं तस्य परब्रह्मतां गमयति । नारायणशब्दस्य पूर्वोपदर्शितरीत्या षष्ठी तत्पुरुषेण सकलजगदाधारत्व उपायत्वोपेयत्वानां लाभात् । अत्र नारायणशब्दस्य षष्ठी तत्पुरुषः —

" नाराणामयनत्वाच्च नारायण इतिस्मृतः । "
" नारस्त्विति सर्वपुंसां समूहः परिकीर्तितः ।
गतिरालम्बनं तस्य तेन नारायणः स्मृतः ॥ "

" नारोनराणां संघात स्तस्याह मयनंगतिः ।
तेनास्मि मुनिभिर्नित्यं नारायण इतीरितः ॥ "

इत्यादि ब्रह्मकैवर्तादिवचननिकरानुग्राह्यः । अयनशब्दस्य केवलाधिकरण त्वार्थकत्वेपि " यत्प्रयन्त्यभिसंविशन्ति " इत्यादि श्रुतिस्मृत्युक्तरीत्या ब्रह्मणएव सकलजगल्लयाधिष्ठानत्वेन सकलजगदधिकरणतया नाराधिकरणत्वस्य ब्रह्मासा धारणधर्मत्वेन तस्यात्र विष्णौ प्रतिपादनेन विष्णोः परब्रह्मत्वसाधकत्वं नारायण त्वस्य बोद्धव्यम् ।

एवं नाराः अयनं यस्य स नारायण इति बहुव्रीहिरपि नारायणशब्दस्य बहुवचननिकरानुगृहीतः । तथाचसति नारायणत्वं चेतनाचेतनात्मक जगद्वर्ति त्वं पर्यवसानत स्सकलजगच्छरीरकत्वं सकलजगदन्तर्यामित्वं वा सिद्ध्यति । तच्च पूर्वोदाहृतै रन्तर्यामि ब्राह्मणादिवचनैः ब्रह्मणोसाधारणतयावगतं । स्फुटीकृ त श्चायमर्थः-

" यच्च किञ्चि ज्जगत्यस्मिन् दृश्यते श्रूयतेपिवा ।
अन्तर्बहिश्च तत्सर्वं व्याप्यनारायणः स्थितः ॥ "

इति श्रुत्या,

" नराज्जातानि तत्वानि नाराणीति ततोविदुः ।
तान्येवचायनं तस्य तेन नारायणः स्मृतः ॥ "

इति महाभारतो द्योगपर्व वचनेन-

" आपो नारा इतिप्रोक्ता आपो वै नरसूनवः ।
ता यदस्यायनंपूर्वं तेन नारायण स्स्मृतः ॥ "

इति मनुवचनेना न्यैश्चैवंजातीयकै र्बहुभि र्वचनैः ।

तदेवं नारायणत्वस्य ब्रह्मासाधारणधर्मस्यात्र विष्णौ प्रतिपादना द्विष्णु ऐव परंब्रह्मेति साधितं भवति ।

अथवा — " नारायणत्वा " दित्यस्य नारायणशब्दवाच्यत्वा दित्यर्थः । नारायणशब्दोहि " एकोह वै नारायण आसीत् " इत्यादिश्रुतिस्मृतिषु ब्रह्मणि मुख्यतया प्रयुक्तो दृश्यते । स एव चात्र विष्णौ प्रयुक्तो महर्षिणा । सच्च विष्णोः परब्रह्मत्व मन्तरा ऽनुपपन्नः । इत्थं च विष्णो र्नारायणशब्दवाच्यत्वं पर ब्रह्मतासाधक मिति सिद्ध्यति । तदेवं ' नारायणत्वा ' दित्ययं हेतु स्साधु निरूढो भवतीति स्थितम् ।

" देवेशत्वा व्ययत्व त्रिदशपति शिव स्रष्टृमुख्यामरौघप्रत्यक्षान्तर्धिभि श्च " — देवेशत्वं — सकलदेवतास्वामित्वं; अव्ययत्वं - व्ययरहितत्वं, नाशशून्यत्वपर्यवसितं; त्रिदशपतिः - इन्द्रः, शिवः - रुद्रः, स्रष्टा - चतु र्मुखः, ते मुख्या येषां , तेषा ममराणां, ओघस्य - समूहस्य, प्रत्यक्षं यथा भवति तथा, तेषु पश्यत्स्वित्यर्थः, अन्तर्धिः - अन्तर्धानं; तैः - देवतासार्व भौमत्व नाशरहितत्व सकलदेवसंघदर्शनसमानकालीनान्तर्धानकर्तृत्वैरित्यर्थः ।

एतत्पदविवक्षितं च देवेशत्वादित्रिकं प्रत्येक मेव सर्वोत्तमत्वसाधने हेतुः, समुदितस्य हेतुत्वे व्यर्थविशेषणत्वापातात् ।

तत्र देवतासार्वभौमत्वरूपदेवेशत्वस्य सर्वोत्तमत्वसाधकत्वं निर्विवाद मेव, देवतिर्यङ्मनुष्यपशुपक्ष्यादिरूपेषु प्राणिषु देवानामेवो त्तमतया तदी- शत्वस्य सर्वप्राणिजातोत्तमताव्याप्तत्वात् ।

अव्ययत्वं च सर्वप्रकारनाशरहित्यरूपं नाशवद्भ्य श्चेतनाचेतनेभ्यः कृत्स्नेभ्य स्स्वाश्रयस्य उत्तमत्वं साधयति । तत्र यद्यपि चेतनानां प्रकृते श्च नित्यत्वं सिद्धान्तसिद्धं, तथापि तेषा मपि नाशवत्त्वं सर्वैरुपगत मेव, चेतनानां शरीरवियोगादिरूपनाशस्य प्रकृते श्चावस्थान्तरापत्तिरूप

नाशस्य सर्वसम्मतत्वात् । पूर्वावस्थाविशिष्टस्योत्तरावस्थायोगो विनाशः, स्वावस्थस्य तूत्पत्तिरिति ह्युत्पत्तिविनाशौ सिद्धान्तसिद्धौ, तादृश श्च विनाश श्चिदचित्साधारण एव ।

अथवाऽव्ययत्वं विकारराहित्यं, तच्च स्वरूपेणगुणैश्च विवक्षितं । चेतनानां ज्ञानद्वारा प्रकृतेश्च स्वरूपतएव विकारवत्त्वं सर्वसम्मतं । तादृशं विकारराहित्यं चेतनाचेतनात्मक सकलजगदुत्तमत्वं स्वाश्रयस्यसाधयति । अव्ययशब्दश्च विकारराहित्यपरतया व्याख्यात श्शंकरकृते सहस्रनामभाष्ये 'पूतात्मापरमात्मा चे' ति श्लोकव्याख्याने "नास्य व्ययो विनाशो विकारोवा विद्यत इत्यव्ययः । " इति।

इन्द्रादिदर्शनसमानकालीना न्तर्धानकर्तृत्वं च तेभ्यउत्कृष्टतासाधक मेव । यस्मिन्पश्यति योन्तर्हितोभवति सतस्माच्छक्त्यतिशयशालीति हि सर्व सम्मतम् । ततश्च इन्द्ररुद्र चतुर्मुखादिषु पश्यत्स्वेव विष्णो रन्तर्हितत्वं तेभ्य स्तस्याधिक्य मवगमयति ।

एषु च देवेशत्वादिषु त्रिषु हेतुषु प्रथमं देवेशत्वं श्रीरामायणे बालकाण्डे पंचदशसर्गे–

" एवमुक्तस्तुदेवेशो विष्णु स्त्रिदशपुंगवः । "

इति श्लोक उक्तम् । अव्ययत्वं च तस्मिन्नेव काण्डे षोडशसर्गे–

" एव मुक्ता स्सुरा स्सर्वे प्रत्यूचु र्विष्णु मव्ययम् । "

इत्यत्रोक्तम् । तृतीयोपि हेतु स्तस्मिन्नेव सर्गे-

" सकृत्वानिश्चयंविष्णु रामन्त्रय च पितामहम् ।
अन्तर्धानं गतो देवः पूज्यमानो महर्षिभिः ॥ "

इति श्लोकेन प्रत्यपादि । अत्र च श्लोके देवशब्देन इन्द्र शिवचतुर्मुखप्रभृतय स्सर्व एव सुरा उच्यन्ते, तेषां सर्वेषामेव पूर्वं प्रकृतत्वात् । " देवैःपूज्यमानो

न्तर्धानं विष्णुर्गत " इत्यनेन देवेषु तत्र सन्निहितेषु पश्यत्स्वेव विष्णो रन्तर्धानप्राप्ति रुक्ता भवति ।

इत्थं पूर्वोक्तै स्सर्वै र्हेतुभिर्महर्षि र्वाल्मीकि र्विष्णोः परब्रह्मता मवद दित्याह (अचकथतेति) " मुनीन्द्रः "– मुनिश्रेष्ठो वाल्मीकिः । " विष्णुं "- भगवन्तं नारायणम् । " परं "- सर्वस्मादुत्कृष्टं, " ब्रह्म " च, अचकथत; यद्वा- "विष्णुं" " परंब्रह्म " " अच कथत "- अकथयत् ।

एवं बालकाण्डे एकोनत्रिंशसर्गात्पूर्वेषु सर्गेषु विष्णोः परब्रह्मता साधकतया वाल्मीक्यभिप्रेतान् हेतून् संगृह्य, एकोनत्रिंशसर्गगान् तान् संगृह्णाति (एकोनत्रिंशसर्गेपीति)

एकोनत्रिंशसर्गे प्यचकथत परं ब्रह्म सर्वात्मभावा
दीदृक्चेदं तथैतावदिति च वचसा काप्यनिर्देश्यभावात् ।
गीतोक्ता द्वैश्वरूप्या दनितरसुलभा दागमांतप्रसिद्ध
स्वेच्छाधीनाश्रितार्थावतरणकरणाच्चापिविष्णुंमहर्षिः ॥४॥

" महर्षिः, एकोनत्रिंशसर्गेपि, विष्णुं, परंब्रह्म, अचकथत " इत्यन्वयः ।

" सर्वात्मभावात् "–सर्वान्तर्यामित्वात् । सर्वान्तर्यामित्वस्य परब्रह्म धर्मत्वंच पूर्वमेव न्यरूपि । सोयं हेतु र्बालकाण्डे एकोन त्रिंशे सर्गे-

" त्रीन् क्रमा नथ भिक्षित्वा प्रतिगृह्य च मानदः ।
आक्रम्य लोकान् लोकात्मा सर्वभूतहितेरतः ॥ "

इति श्लोके " लोकात्म " शब्देन प्रतिपादितः । तत्रहि वामनत्वेनावतीर्णो विष्णु " लोकात्मे " ति विशेष्यते । लोकात्मत्वं च चेतनाचेतनात्मक कृत्स्नजगदन्तर्यामित्वमेव । एवंच लोकात्मत्वस्य परब्रह्मधर्मस्य विष्णौ प्रतिपादनाद्विष्णुः परंब्रह्मेति साधितं भवति ।

(ईदृगित्यादि) " इदं ", " ईदृक् "-एतादृश स्वरूपवत्, "तथा", " एतावत् "- इयत्परिमाणवत, " इति " - एवम्प्रकारेण; "वचसा" - शब्देन; "क्वापि" - लोकेवेदेवा; "अनिर्देश्यभावात्" - निर्देष्टुमशक्यत्वात्, इदमेतादृशं इयत्परिमाणवच्चेति निर्देष्टुमशक्यत्वात्; वाचामगोचरत्वादिति यावत्।

इदंच वाचामगोचरत्वरूपं अनिर्देश्यत्वं परब्रह्मणोऽसाधारणोधर्मः, अन्येषां चेतनाचेतनानां वाचानिर्देष्टुं शक्यत्वात। तथाच श्रूयते केनोपनिषदि प्रथमे खण्डे-

" यद्वाचा नभ्युदितं येनवागभ्युद्यते ।
तदेव ब्रह्मत्वं विद्धि नेदं यदिद मुपासते ॥ "

— इति

अस्याश्रुतेरयमर्थः—

" यत् "- वस्तु । " वाचा "- वागिन्द्रियेण, शब्दस्वरूपेणवा । "अनभ्युदितं" - अनुक्तं, अविषयीकृतंवा, वक्तुमयोग्यमित्यर्थः । ' येन '- वस्तुना । ' वाक् '- वागिन्द्रियं शब्दोवा, ' अभ्युद्यते ' - शब्दप्रयोगसमर्थं क्रियते, विषयीकरणयोग्यः क्रियतेवा । ' तदेव '- वस्तु । ' त्वं ' । ' ब्रह्म '- परब्रह्म । ' विद्धि ' - जानीहि । ' यत् '- वस्तु । 'इदम्'- इदंकारगोचरं । "उपासते", जनाः । 'इदं' । 'न'- ब्रह्म नभवति । इति।

अनयाच श्रुत्या ब्रह्मणो वाचानिर्देष्टुमशक्यत्वं सुस्पष्टमेव प्रतिपादितम्।

पुराणरत्नेच —

" प्रत्यस्तमितभेदं यत्सत्तामात्रमगोचरं ।
वचसा मात्मसंवेद्यं तज्ज्ञानंब्रह्मसंज्ञितम् ॥ "

इत्यत्र वचसामगोचरत्वं ब्रह्मणस्सुस्पष्टमेवोक्तं । एवमन्याअपि श्रुतिस्मृतय उदाहर्तव्याः । अत्र सर्वत्र प्रतिपाद्यमानं वचसामगोचरत्वं ' ब्रह्मेदशं

एतावत्' इत्यादिरूपेण निर्देष्टमशक्यत्वमेव, नतु सामान्यतःशब्देना निर्देश्यत्वं, ब्रह्मणोपि ब्रह्मशब्देन निर्देष्टुं शक्यत्वेना सांगत्यात् ।

सचायं ब्रह्मणो साधारणो ऽ निर्देश्यत्वरूपो धर्मः बालकाण्डे एकोनत्रिंशे सर्गे —

" शरीरे तव पश्यामि जगत्सर्व मिदं प्रभो ।
त्वमनादि रनिर्देश्य स्त्वामहं शरणंगतः ॥"

इत्यत्रा निर्देश्यशब्देन विष्णोःप्रतिपाद्यमानो विष्णोः परब्रह्मतां साधयति ॥

(गीतोक्तादिति) " गीतोक्तात् " — गीतायां - पंचमवेदसारभूतायां भगवद्गीतायां; उक्तात - दशमैकादशाध्यायस्थो रुक्तात् । " वैश्वरूप्यात् " — विश्वरूपवत्त्वात् ।

गीतायां हि दशमाध्याये —

" वक्तु मर्हस्यशेषेण दिव्याह्यात्मविभूतयः ।
याभि र्विभूतिभि र्लोका निमां स्त्वं व्याप्य तिष्ठसि ॥"

इत्यर्जुनेन पृष्टे भगवद्विभूतियोगे

" अह मात्मा गुडाकेश सर्वभूताशयस्थितः ।
अह मादिश्च मध्यं च भूताना मन्त एव च ॥"

इत्यारभ्य

" अथवा बहुनैतेन किं ज्ञानेन तवार्जुन ।
विष्टभ्याह मिदं कृत्स्न मेकांशेन स्थितो जगत ॥"

इत्यन्तेन भगवतोपदिष्टे, तत्रात्मनो विश्वासातिशयसद्भावप्रकाशनपूर्वकं तादृश विभूतिगुणविशिष्टस्य भगवतो विश्वरूपस्य दिदृक्षायां पुनरर्जुनेन

" एव मेत द्यदात्थ त्व मात्मानं परमेश्वर ।
द्रष्टु मिच्छामि ते रूप मैश्वरं पुरुषोत्तम ॥"

इत्यनेन प्रकाशितायां, भगवानपि स्वीय मप्राकृतं परमयोगिना मपि वाङ्मनसा गोचरं सकलजगदाधारभूतं दिव्यं रूपं प्रकाशयामास । यत्र च युगप दुदितरविसहस्रसमप्रभे ऽ नेकवक्त्रनयने ऽ प्राकृतविविधदिव्यभूषासमुज्ज्वले समुद्यतशंखचक्रगदासिशार्ङ्गादिदिव्यायुधे ऽत्यद्भुतदर्शने भगवतो रूपे निखिलमपि देवतिर्यङ्मनुष्यस्थावररूपं जग दध्यक्षयन् धनञ्जयः —

" पश्यामि देवां स्तव देव देहे
सर्वां स्तथाभूतविशेषसंघान् ।
ब्रह्माण मीशं कमलासनस्थ
मृषीं श्च सर्वा नुरगां श्च दिव्यान् ॥ "

इत्याह । तदिदं गीतोक्तं वैश्वरूप्य मेव च " सहस्रशीर्षा पुरुषः " इत्या द्युपनिषन्निकरसिद्धं । इत्थं गीतोक्त मिदं भगवदसाधारणं विश्वरूपवत्त्व मत्र बालकाण्डे एकोनत्रिंशे सर्गे —

" शरीरे तव पश्यामि जगत्सर्व मिदं प्रभो । "

इति श्लोके विष्णोः प्रतिपाद्यमानं तस्य परब्रह्मतां साधयति । यथा च विश्वरूपं साक्षात्कुर्वतार्जुनेन " पश्यामि देवां स्तव देव देह " इत्युक्तं, तथै वात्रापि " शरीरे तव पश्यामी " त्याद्युक्त मिति गीतोक्तं विश्वरूपवत्त्व मेवा त्रापि प्रतिपाद्यत इति हेतु रयं साधु निर्व्यूढः ।

(अनितरसुलभादिति) इदं च " स्वेच्छाधीनाश्रितार्थावतरणकरणा " दित्यनेनान्वितं । आगमान्तेषु - वेदान्तेषु, प्रसिद्धं, स्वेच्छाधीनं, आश्रितार्थं च यदवतरणं, तस्य करणादित्यर्थः । कर्मा द्यनधीनाश्रित संरक्षणैकप्रयोजनक संकल्पमात्राधीनावतारकर्तृत्वादिति फलितो हेतुः ।

यजुरारण्यके तृतीये प्रश्ने " अद्भ्य " इत्यनुवाके श्रूयते —

" प्रजापति श्चरति गर्भे अन्तः । अजायमानो बहुधा विजायते । तस्य धीराः परिजानन्ति योनिम् । "

—इति ।

अस्या श्च श्रुते रित्थमर्थो बोध्यः — "प्रजापतिः" — प्रजानां - प्रजननधर्माणां चेतनानां, पतिः - स्वामी परमपुरुषः। "गर्भे अन्तः" - अन्तर्गर्भे, - हृदयगुहाया मिति यावत्। "चरति" - वसतीत्यर्थः। अनेन "योवेद निहितं गुहाया" मित्युक्तं परमात्मत्व मुक्तम्भवति। सोयं परमात्मा। "अजायमानः" - अनाद्यविद्याकर्मवासना विवशचेतन वदजाय मानोपि। "बहुधा" बहुप्रकारेण, देवतिर्यङ्मनुष्यादि विविधाकारेण। "विजायते"—विविधोजायते, एकैकस्यामेव जातौ नानारूपेणजायतइत्यर्थः। "तस्य"- परमपुरुषस्य। योनिं - अवतारहेतुम्। धीराः - परिजानन्ति। यद्वा, तस्य - तथा जननस्य, योनिं हेतुं। धीराः - धीमतामग्रेसराः पराशरादयः। परिजानन्ति सम्यगवगच्छन्ति, नत्वन्यइत्यर्थः। इति।

अत्रचा जायमानत्वबहुधाविजायमानत्वयोः परस्परविरोधेनैकत्रासम्भवात्, एकत्र प्रतिपाद्यमानयो स्तयोः परस्परविरोधेनैव निर्वाह्यतया, अजायमानत्वं चेतनादिवत् कर्माधीन कर्मफलभोगार्थजनिमत्त्वाभावरूपं, बहुधाविजायमानत्वंच स्वेच्छाधीनाश्रितसंरक्षणप्रयोजनकावताररूपंचा स्थेयम्; उभयत्र जायमान शब्दार्थस्यैकरूपत्वे तत्तदभावरूपयो र्जायमानत्वाजायमानत्वयो रेकत्रप्रतिपादना सम्भवात्। तथा चानया श्रुत्या भगवत स्स्वेच्छाधीना कर्मकृताश्रितार्था वतरणकर्तृत्व मुक्तं भवति। भगवदवतारस्याश्रितसंरक्षणार्थत्वंचा नन्तरवाक्य एवोच्यते—"योदेवेभ्य आतपती" ति। "यः"—परमपुरुषः "देवेभ्यः"- देवतार्थे। "आतपति"—आसमन्ता दैश्वर्यश्रियायुक्तः प्रकाशते। "तप ऐश्वर्य" इतिधातुः। तेषां मनोरथपूरणायसर्वत्रप्रकाशतइत्यर्थः। यद्वा — "आतपति" — आसमंतात्तापयति, देवशत्रू नसुरादी नित्यर्थः। "तप संताप" इतिधातुः। भगवदवतारस्य साधुसंरक्षणव दुष्कृद्विनाशोपिहि फलम्।

भगवदवतारस्य स्वेच्छामात्राधीनत्वंच —

"अजोपिस न्नव्ययात्मा भूतानामीश्वरोपि सन्।
प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया॥"

इति भगवतैव भगवद्गीतासु चतुर्थेध्याये गीतम् । अत्र " आत्ममायया सम्भवामी " ति निजावतारस्य निजमायाशब्दित संकल्पात्मकेच्छाधीनत्वं स्फुटीकृतम् । मायाशब्दोहि " मायावयुनंज्ञान " मिति ज्ञानपर्यायतया पठित स्संकल्पात्मक ज्ञानपरः । एवं भगवदवतारस्या श्रितसंरक्षणप्रयोजन कत्वमपि तस्मिन्नेवाध्याये —

" परित्राणाय साधूनां विनाशायच दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगेयुगे ॥ "

इति श्लोके गीतम् , अत्र " साधूनां परित्राणाय सम्भवामी " ति निजसम्भवस्य साधुपरित्राण प्रयोजनकताकथनात् ।

अयमर्थश्च पराशरेणापि पुराणरत्ने षष्ठांशे सप्तमेध्याये —

" समस्तशक्तिरूपाणि तत्करोति जनेश्वर ।
देवतिर्यङ्मनुष्यादि चेष्टावन्तिस्वलीलया ॥
जगतामुपकाराय नस्वाकर्मनिमित्तजा । "

इति प्रस्फुटमुक्तः । तत्र हि " प्रत्यस्तमितभेदं " इत्यारभ्य योगिनां ध्येयं ब्रह्मणोरूपं प्रतिपादय न्पराशरः मूर्तामूर्तात्मकं रूपद्वयंप्रतिपाद्य, समस्तशक्त्याश्रयं निजं रूपमेव भगवान् जगदुपकाराय देवादिरूपाणि लीलया करोतीत्याह ।

एवं विंशे ध्याये —

" इच्छागृहीता भिमतो रुदेह स्संसाधिताशेष जगद्धितोसौ ।"

इति च ।

तदेवं श्रुतिस्मृतिपुराणेषु प्रसिद्धं परमपुरुषैकान्तं स्वेच्छामात्राधीनाश्रित संरक्षणप्रयोजनकावतारकर्तृत्वं श्रीरामायणे एकोनत्रिंशसर्गे विष्णोः प्रति-

पाद्यमानं तस्य परमपुरुषत्वं साधयति । तस्मिन् हि सर्गे - वामनात्मना विष्णो स्वतारस्या श्रितदेवसंघसंरक्षणार्थत्वं इच्छामात्राधीनत्वं च प्रस्फुटम्प्रकरणादिभि स्वगम्यते । तत्रहि–

" एतस्मि न्नेव काले तु राजा वैरोचनि र्बलिः ।
निर्जित्य दैवतगणान् सेन्द्रांश्च समरुद्गणान् ।
कारयामास तद्राज्यं त्रिषु लोकेषु विश्रुतः ॥ "

इति बलेः सकलसुरगणविजयपूर्वक त्रैलोक्यराज्यकरण कथनमुखेन देवतानां दुःखसम्भवं प्रतिपाद्य,

" बलेस्तु यजमानस्य देवा स्साग्निपुरोगमाः ।
समागम्य स्वयञ्चैव विष्णु मूचु रिहाश्रमे ॥ "

इति बलिनो पद्रुतानां देवानां कमलापति सन्निध्यभिगमनं प्रतिपाद्य,

" बलि वैरोचनि र्विष्णो यजते यज्ञ मुत्तमम् ।
असमाप्ते क्रतौ तस्मिन् स्वकार्य मभिपद्यताम् ॥
येचैन मभिवर्तन्ते याचितार इतस्ततः ।
यच्च यत्र यथावच्च सर्वं तेभ्यः प्रयच्छति ॥
सत्वं सुरहितार्थाय मायायोग मुपाश्रितः ।
वामनत्वं गतो विष्णो कुरु कल्याण मुत्तमम् ॥ "

इति भक्तपराधीनस्य भक्तकार्यमपि स्वकार्य मभिमन्यमानस्य विष्णो स्सन्निधौ देवानां स्वेच्छया वामनात्मनावतीर्य स्वानिष्टनिवारणपूर्वक स्वेष्टसाधन प्रार्थनं प्रतिपाद्य, ततोमध्ये

" एतस्मि न्नन्तरे राम काश्यपोग्निसमप्रभः । "

इत्यादिना वामनतया भगवतो वतारं सोपोद्घात मवतार्य, ततश्च—

" वामनं रूप मास्थाय वैरोचनि मुपागमत् ।
त्रीन्क्रमा नथ भिक्षित्वा प्रतिगृह्यच मानदः ॥
आक्रम्य लोकान् लोकात्मा सर्वभूतहिते रतः ।
महेन्द्राय पुनः प्रादा न्नियम्य बलिमोजसा ॥
त्रैलोक्यं स महातेजा श्चक्रे शक्रवशं पुनः ॥ "

इति वामनरूपधारिणो भगवत स्त्रैविक्रमाकारपरिग्रहणपूर्वकं निजाश्रितदेव संघ दुःखदबलिनिग्रहेण तदीयदुःखापनोदनं वर्णयित्वा शक्राय त्रैलोक्य राज्यदानेन तदिष्टसम्पादनं च प्रतिपादितम् ।

अत्रच भगवदवतारस्य निजाश्रित देवसंघदुःखनिवारणार्थता प्रस्फुटमेव प्रतीयते । तादृशावतारस्येच्छामात्राधीनत्वं च पूर्वोदाहृतेन " सत्वंसुरहितार्थाय मायायोगमुपाश्रितः । " इति श्लोकेन व्यक्तीकृतं , " मायायोगमुपाश्रित " इति मायाशब्दित संकल्पा परपर्यायेच्छया वामनरूपधारण प्रतिपादनदर्शनात् । " धर्मसंस्थापनार्थाय सम्भवाम्यात्ममायया । " इति भगवद्गीता वचने भगव दवतारहेतुतया प्रतिपादितो मायाशब्दित स्संकल्प एवात्रा प्यवतारहेतुतया प्रतिपाद्यते, शब्दतोर्थतश्च तच्छ्लोकार्थ प्रत्यभिज्ञानात् ।

तदेव माश्रितार्थ स्वेच्छाधीनावतारवत्त्वस्या त्र प्रतिपादनेन विष्णोः परम पुरुषत्वमेवात्रोक्तं भवति मुनिनेति सर्वं सुस्थम् ।

अथ बालकाण्डे मुनिना प्रकटितं विष्णो श्शिवादुत्कृष्टत्वं सहेतुक मुप न्यस्यति (भंगाच्चेति)

भंगाच्च त्रैपुरयोधन विदितमहावैभवस्येशचाप
स्यैवंहुंकारमात्रा त्त्रिण यनजडतापादकत्वाच्च युद्धे ।
निर्णीतत्वाच्च देवैः पशुपतिधनुषो जृम्भणं दृष्टवद्भिः
श्रेष्ठत्वेनाब्जनाभं मुनिरपिच शिवा दुत्तमं निश्चिकाय ॥५॥

ಆಯ್ಕೆಯ ಸಂಖ್ಯೆ 1896

" त्रैपुरायोधनविदितमहावैभवस्य " - ' त्रैपुरं ' - त्रिपुरासुरसम्बन्धि यत् , ' आयोधनं ' - युद्धं, तत्र, ' विदितं ', ' महत् ', ' वैभवं ', यस्यतस्य । त्रिपुरासुरवधेन प्रसिद्धवैभवस्येतियावत् । " ईशचापस्य " - रुद्रधनुषः । " भंगात् " - भेदनात् । तथाच त्रिपुरवधादिकर्तृ शिवधनुर्भंजनादिति हेतुः फलितः ।

9049

SRI BHAMARAMBA SANSKRIT COLLEGE LIBRARY FORT, BANGALORE.

अयंच हेतु र्बालकाण्डे सप्तषष्टितमे सर्गे —

" लीलया स धनुर्मध्ये जग्राह वचनान्मुनेः ।
पश्यतां नृसहस्राणां बहूनां रघुनन्दनः ॥
आरोपयित्वा धर्मात्मा पूरयामास तद्धनुः ।
तद्बभंज धनु मध्ये नरश्रेष्ठो महायशाः ॥ "

इत्यत्र प्रतिपादितः । रामेण भग्नं धनुश्चेदं रुद्रस्यैवेत्ययमर्थः—

" दक्षयज्ञवधे पूर्वं धनुरायम्य वीर्यवान् ।
रुद्रस्तु त्रिदशान् रोषा त्स्वलील मिद मब्रवीत् ॥
यस्मा द्भागार्थिनो भाग न्नाकल्पयत मे सुराः ।
वरांगाणि महार्हाणि धनुषः शातयामि वः ॥
ततो विमनस स्सर्वे देवा वै मुनिपुंगव ।
प्रसादयन्ति देवेशं तेषां प्रीतो भवद्भवः ॥
प्रीतियुक्त स्स सर्वेषां ददौ तेषां महात्मनाम् ।
तदेत द्देवदेवस्य धनूरत्न म्महात्मनः ॥ "

इति बालकाण्डीय षट्षष्टितमसर्गे स्य धनुषो निजकुले समागमं वर्णयतो जनकस्य वचनेन सुस्पष्टः । उत्तरत्र पंचसप्ततितमसर्गे —

" इमे द्वे धनुषी श्रेष्ठे दिव्ये लोकाभिविश्रुते ।
दृढे बलवती मुख्ये सुकृते विश्वकर्मणा ॥

अतिसृष्टं सुरैरेकं त्र्यम्बकाय युयुत्सवे ।
त्रिपुरघ्नं नरश्रेष्ठ भग्नं काकुत्स्थ यत्त्वया ॥ "

इति परशुरामेणा प्ययमर्थ स्स्पष्टीकृतः । श्रीरामचन्द्रेण भग्नं धनु त्रिपुरवधादिक रणक्षम मित्येत त्परशुरामवाक्यगतेन त्रिपुरघ्नमिति पदेन व्यक्तीकृतम् ।

अत्रच श्रीरामस्यैव शिवधनुर्भंजकत्वप्रतिपादनेपि रामात्मना विष्णोरेवा ऽवतीर्णतायाः पूर्वं निरूपिततया हेतो स्य विष्णौ शिवात्परत्व साधकत्वं सम्भ वत्येव ।

अथ हेत्वन्तरमाह " एवमि " त्यादिना । " युद्धे " - ब्रह्मणादेवानां संशयनिवारणाय समुत्पादिते दक्षयज्ञानन्तरजाते विष्णुशिवयोरणे । " हुंकार मात्रात् " - हुंकारेणैव केवलं । " त्रिणयनजडतापादकत्वात् " - ' त्रिणयन स्य ' - रुद्रस्य, ' जडतापादकत्वात् '- जडतोत्पादकत्वादित्यर्थः । अयंच हेतुः बालकाण्डे पंचसप्ततितमे सर्गे—

" विरोधेच महद्युद्ध मभव द्रोमहर्षणम् ।
शितिकण्ठस्य विष्णोश्च परस्पराजिगीषुणोः ॥
तदातु जृम्भितं शैवं धनु र्भीमपराक्रमम् ।
हुंकारेण महादेवः स्तम्भितोथ त्रिलोचनः ॥ "

इत्यत्र परशुरामवाक्ये प्रतिपादितः । ' त्रिलोचनो महादेवः - रुद्रः, हुंकारेण - विष्णोः, स्तम्भितः - जडीकृतः, इतिहि तदर्थः । इत्थं हुंकारमात्रेण जडतापा दकस्य विष्णो शिवादुत्कृष्टत्वंहि सर्वाभ्युपगन्तव्य मिति भावः ।

अथा परं हेतुमाह (निर्णीतत्वादिति) पशुपतिधनुषः " - रुद्रधनुषः । " जृम्भणम् " , " दृष्टवद्भिः " - आलोकितवद्भिः । " देवैः " - मनुष्यापेक्षयातिशयितज्ञानैरमरैः । " श्रेष्ठत्वेन निर्णीतत्वात् " - उत्कृष्टतया स हेतुकं निर्धारितत्वात् । अस्मदपेक्षयातिशयितज्ञानै र्देवैरेव विष्णो हुंकारमात्रेण

रुद्रधनुषो जृम्भण मवलोक्य रुद्रापेक्षया विष्णुरेवातिशयित ज्ञानशक्त्यादि मानिति निश्चितत्वादित्यर्थः।

बालकाण्डे पंचसप्ततितमे सर्गेहि " विष्णुशिवयो र्मध्ये कोतिशायितज्ञा नशक्तिमानिति ज्ञातुकामानां देवाना मभिप्रायं ज्ञात्वा तदीयसन्देहनिवारणाय चतुर्मुखेन हारिहरयो र्विरोधे समुत्पादिते तयो र्लोमहर्षणं महद्युद्धमभूत्। तदा भगवान् सर्वेश्वरो विष्णु र्हुंकारमात्रेण शिवकरस्थं धनुर्जृम्भयित्वा शिवमपि निश्चे ष्टं स्तम्भितमकरोत्। इत्थं विष्णो र्हुंकारमात्रेण शिवं जडीभूतं तदीयं धनुश्च जृम्भित मवलोक्य देवा विष्णुरेव शिवात्परइति निरचिन्वन्। " इति दक्षयज्ञा नन्तरकालिको वृत्तान्तः परशुरामेण वर्णितो दृश्यते। यथोक्तं तत्र-

" तदातु देवता स्सर्वाः पृच्छन्तिस्म पितामहम्।
शितिकण्ठस्य विष्णोश्च बलाबलनिरीक्षया॥
अभिप्रायन्तु विज्ञाय देवतानां पितामहः।
विरोधं जनयामास तयो स्सत्यवतां वरः॥
विरोधेच महद्युद्ध मभव द्रोमहर्षणम्।
शितिकण्ठस्य विष्णोश्च परस्परजिगीषुणोः॥
तदातु जृम्भितं शैवं धनु र्भीमपराक्रमम्।
हुंकारेण महादेवः स्तम्भितोथ त्रिलोचनः॥
देवै स्तदा समागम्य सर्षिसंघै स्सचारणैः।
याचितौ प्रशमं तत्र जग्मतु स्तौ सुरोत्तमौ॥
जृम्भितं तद्धनु र्दृष्ट्वा शैवं विष्णुपराक्रमैः।
अधिकं मेनिरे विष्णुं देवा स्सर्षिगणा स्तदा॥ "

— इति।

इत्थं पूर्वोक्तैः हेतुभि र्मुनि र्वाल्मीकि र्विष्णोः परत्वं साधयतीत्याह (अब्जनाभमिति) " अब्जनाभं "- भगवन्तं नारायणं चतुर्मुखस्यापिस्रष्टारं। " मुनिरपि " - वाल्मीकिरपि। " शिवादुत्तमं " - शिवापेक्षयोत्कृष्टं। "निश्चि काय"- निरचिनोत्। उक्तहेतून्प्रतिपादयतो वाल्मीके रयमेवाभिप्राय इतिभावः।

अथेत्थं दक्षाध्वरानन्तरकाले देवै र्विष्णु श्शिवादुत्कृष्टतया निर्णीतइति परशुरामवाक्य मुखेन पूर्ववृत्तकथना दर्था दन्यदपि किंचित्सूचितं भवतीत्याह (इत्थमिति)

इत्थं ब्रह्मादिदेवै र्हरिरधिकतया निश्चितोभूत्पुरेति
प्राग्वृत्तान्तं ब्रुवाणो मुनिरय मखिला न्मूकयत्यर्थत स्तान् ।
लक्ष्मीकान्तस्य दक्षाध्वरविहतिकृता वीरभद्रेण पुंसा
प्राहुर्येनिर्जितत्वं जगुरपिच ततो न्यूनतां पार्वतीशात् ॥६॥

" इत्थं " - पूर्वोक्तप्रकारेण । " पुरा " - पूर्वकाले, दक्षाध्वरानन्तरकालइत्य र्थः । " ब्रह्मादिदेवैः " - चतुर्मुखप्रमुखै रमरैः । " हरिः " - विष्णुः । "अधि कतया " - उत्कृष्टत्वेन । " निश्चितोभूत् " - निर्णीतोभूत् । " इति " – एवं रूपं । " प्राग्वृत्तान्तं " - प्राचीनमुदन्तं । " ब्रुवाणः " - परशुरामवाक्य मुखेन वदन् । " अयं मुनिः " - वाल्मीकिः । " अर्थतः"-अर्थात् । "तान्" वक्ष्यमाणान् । " अखिलान् " - सर्वान् । " मूकयति " - मूकीकरोति । मूको यथा किंचिदपि वचनं वक्तु मसमर्थो भवे त्तथैता नपि किंचिदपि वक्तु मसमर्थान् करोतीत्यर्थः । केतइत्यत्राह (लक्ष्मीकान्तस्येति) " ये " - शिवपा रम्याभिमानिनः । " लक्ष्मीकान्तस्य " - श्रियःपते र्विष्णोः । " दक्षाध्वरविह तिकृता " - दक्षाध्वरस्य - दक्षप्रजापति कर्तृकयज्ञस्य, विहतिकृता - भंगकारि णा ; " वीरभद्रेण " - वीरभद्रनाम्ना । " पुंसा " - शिवसृष्टेन पुरुषेण । " निर्जितत्वं " - , " प्राहुः " - वदन्ति । " ततः "- तस्मादेवकारणात् । शिवपार्षदभूत वीरभद्रजितत्वादेव हेतोरित्यर्थः । " पार्वतीशात् " - रुद्रात् । " न्यूनताम् " - अपकृष्टतांच । " जगुरपि "- वदन्त्यपि । विष्णोरितिसिद्धं । तान्मूकयतीति पूर्वेणसम्बन्धः ।

अयं भावः-शिवस्य विष्ण्वपेक्षयोत्कर्षं साधयन्तोहि वीरशैवा एवमाहुः— दक्षयज्ञे दक्षेण प्रजापतिना स्वस्मै हविर्भागादानात् , दाक्षायण्या दक्षेणानादृता-

या श्शरीरपरित्यागाच्च कुपितो महादेवो दक्षयज्ञध्वंसाय वीरभद्राभिधानं गणाधिपं प्रेषयामास। सच बहुभिर्गणैः परिवृतो दक्षयज्ञशालां गत्वा शरशतैश्शातयामास तत्रत्यान् सर्वान्मुनीन् देवांश्च। एवं वर्षति वीरभद्रे शरपातमसहमाना देवा मृगादिरूपेण पलायाम्बभूवुः। विष्णुश्च हरिणरूपं गृहीत्वा पलायामास। इत्थं वीरभद्रेण शैवगणभूतेन जितोयं विष्णुश्शिवादपकृष्टएव। तदायगणनिर्जितस्य तस्मान्निकृष्टताया युक्तत्वादिति। तदिद मेषां कथनं नसंगच्छते, यत्र दक्षयज्ञे वीरभद्रेण विष्णोर्जितत्वं कथ्यते, तस्यैवानन्तरं विष्णुशिवयोः कोधिकइति सन्दिहानानां देवानां सन्देहनिराचिकीर्षया चतुर्मुखेन विष्णुशिवयोर्विरोधे समुत्पादिते, प्रवृत्तेच तयो र्युद्धे विष्णुना हुंकारमात्रेण शिवधनुषो जृम्भितत्वं शिवस्य जडीकृतत्वंचावलोक्य देवै रतिशयितज्ञानै र्विष्णुःशिवादुत्कृष्टत्वेन निश्चितइति परशुरामेण पूर्ववृत्तान्तस्या ऽन्यथावर्णितत्वात्। नहि दक्षयज्ञे वीरभद्रेण विष्णो र्निर्जितत्वे तस्य हुंकारमात्रेण शिवस्तम्भनशक्तिरस्तीत्युपपद्यते। अतश्च दक्षयज्ञे वीरभद्रेण निर्जितत्वकथनं प्रमाणविरुद्धं युक्तिविधुरमसम्बद्धमेव। अतश्चेत्थं पूर्ववृत्तान्तं कथयन्नयं वाल्मीकिर्मुनि रन्यथावादिन स्तानेतद्विरोधेन किमप्यन्यथा वक्तुमसमर्था न्करोतीति।

विष्णुशिवयो र्बलाबल परीचिक्षिषया देवैरुत्पादितं तयो र्युद्धं दक्षयज्ञानन्तरकालिकं, दक्षयज्ञश्च त्रिपुरवधानन्तरकालिकः;

" धनूरुद्रस्तु संक्रुद्धो विदेहेषु महायशाः।
देवरातस्य राजर्षे र्ददौ हस्ते स सायकम् ॥ "

इति परशुरामेण विष्णुशिवयो र्युद्धानन्तरं रुद्रेण देवरातहस्ते दत्ततया कथितस्य रामेण भग्नस्य धनुषएव —

" दक्ष यज्ञवधे पूर्वं धनु रायम्य वीर्यवान् । "

इत्यादिना जनकेन धनु रागमप्रणाडीवर्णनसमये दक्षयज्ञवधकाले रुद्रेण हस्ते धृततायाः कथनेन दक्षयज्ञवधसमये रुद्रनिकटस्थं धनु स्तदुत्तरकालजातविष्णु

शिवयुद्धानन्तरं देवराते निहितमिति निर्णेयतया प्रकृतयुद्धस्य दक्षयज्ञानन्तर कालिकतालाभात् । तस्यैव च धनुषः-

" इमे द्वे धनुषी श्रेष्ठे सर्वलोकाभि विश्रुते ।
दृढ़े बलवती मुख्ये सुकृते विश्वकर्मणा ॥
अतिसृष्टं सुरै रेकं त्र्यम्बकाय युयुत्सवे ।
त्रिपुरघ्नं नरश्रेष्ठ भग्नं काकुत्स्थ यत्त्वया ॥ "

इति परशुरामेण त्रिपुरहननसाधनताप्रतिपादनेन त्रिपुरवधस्य दक्षयज्ञानन्तर कालभावित्वे दक्षयज्ञवधानन्तरमेव धनुषो देवराताय प्रदत्तताया जनकेन वर्णना सम्भवेन दक्षयज्ञस्य त्रिपुरवधानन्तरकालिकता लाभाच्च ।

इदमत्र बोध्यम् —

दक्षयज्ञे विष्णो वीरभद्रेण निर्जितत्व कथनं प्रमाणविरुद्धं, दक्षयज्ञवधा त्पूर्वं विष्णो र्यागशालाया मनागतत्वेन तस्य पराजितत्व कथना सम्भवात् ।

यथोक्तं श्रीभागवते चतुर्थस्कन्धे षष्ठाध्याये —

" उपलभ्य पुरैवैत द्भगवा नब्ज सम्भवः ।
नारायणश्च विश्वात्मा न कस्याध्वरमीयतुः ॥ "

— इति ।

भगवान् अब्जसम्भवः - ब्रह्मा, विश्वात्मा नारायणश्च, एतत् - यज्ञवधं, पुरैवोपलभ्य - पूर्वमेव ज्ञात्वा, कस्य - दक्षप्रजापतेः, अध्वरं, नेयतुः - नगतव न्ताविति तदर्थः ।

अतएव च दक्षयज्ञे वीरभद्रेण पराजितानां देवानां चतुर्मुखसन्निधिं गत्वा दक्षयज्ञवध वृत्तान्त निवेदनम् —

" अथ देवगणा स्सर्वे रुद्रानीकैः पराजिताः ।
शूलपट्टसनिस्त्रिंश गदापरिघमुद्गरैः ॥
संछिन्नभिन्नसर्वांगा स्सर्त्वि क्सभ्या भयाकुलाः ।
स्वयम्भुवे नमस्कृत्य कात्स्न्र्येनैत न्नयवेदयन् ॥ "

इति प्रतिपाद्यमानं संगच्छते ।

अत एव च पुन रपि दक्षोज्जीवनानन्तरं वीरसंसर्गशुद्धये वैष्णवत्रिकपाल पुरोडाशहोमे कृते ततो भगवतो हरे राविर्भावः

" अध्वर्युणात्तहविषा यजमानो विशांपते ।
धिया विशुद्धया दध्यौ तदा प्रादुरभू द्धरिः ॥ "

इति प्रतिपाद्यमान श्च संगच्छते ।

तस्मा द्दक्षयज्ञे वीरभद्रेण विष्णो र्जितत्वकथनं युक्तिविरुद्धं प्रमाण विरुद्धं चेति न प्रामाणिक सात्विकजनादरणयोग्य स्स प्रवादः । इति ।

अथ न केवलं शिवा त्परत्व मेव विष्णो र्मुनिः कथितवान्, किन्तु सर्वस्मा त्परत्व मपि विष्णो स्सूचितवा नित्याह (निश्चित्यैव मिति)

निश्चित्यैवं मुरारे र्हरसमधिकतां हेतुभि स्त्वप्रकम्प्यै
श्श्रैष्ठ्यं पाथोजयोने रपिच मुनिवर स्सूचयं स्तत्र भंग्या।
लक्ष्मीकान्तो मुकुन्दं स्सकलसमधिकः श्रैष्ठ्यसंभावनार्हं
ब्रह्मेशानोत्तमत्वादितिविशदयतिस्वाशयंपारिशेष्यात् ॥

" एवं " — पूर्वोक्तप्रकारेण, " अप्रकम्प्यैः " — केनापि युक्त्या भासेन चालयितु मशक्यैः । " हेतुभिः " — पूर्वोक्तै स्तादृशै रन्यै श्च । " मुरारेः " — भगवतो विष्णोः । " हरसमधिकतां " — हरात् - रुद्रात्, समधिकतां - श्रेष्ठतां, " निश्चित्य " — निर्णीय, " तत्र " — तस्मिन्नेव

प्रकरणे, " पाथोजयोने रपि " – ब्रह्मणोप्यपेक्षया, " श्रैष्ठयं " – परत्वं, " भंग्या " - तद्धेतुकथनमुखेन, " सूचयन् " व्यंजयन्, " लक्ष्मीकान्तः " - लक्ष्मीपातित्वेन वेदान्तेषु प्रसिद्धः, " मुकुन्दः " - भगवा न्विष्णु रेव, ' श्रैष्ठ्यसम्भावनार्ह ब्रह्मेशानोत्तमत्वात् ' – श्रैष्ठ्य सम्भावनार्हाभ्याम् – प्रजासर्गकारित्वेन प्रजासंहरणकर्तृत्वेन च हेतुना श्रैष्ठ्यसम्भावनायोग्याभ्यां, ब्रह्मेशानाभ्यां - ब्रह्मरुद्राभ्यां, उत्तमत्वात् श्रेष्ठत्वात्, " पारिशेष्यात् " – पारिशेष्येण, " सकलसमधिकः " – सर्वस्मा त्परः, " इति"- एवंरूपं, " स्वाशयं " – स्वाभिप्रायं, " विशदयति " – ब्रह्मशिवाभ्यां श्रैष्ठ्यकथनमुखेनेत्यर्थः ।

इद मत्राकूतं – विष्णो र्हुंकारमात्रेण शिवस्य जडताप्राप्तिं, देवै र्विष्णो रेवाधिकतया निश्चितत्वं च कथय न्विष्णो श्शिवापेक्षयोत्कृष्टत्वं मुनि रसूचयत् ।

अथ च –

" अक्षयं मधुहन्तारं जानामि त्वां सुरोत्तमम् । "

इति परशुरामवाक्यमुखेन विष्णो र्मधुकैटभहननकथनच्छला च्चतुर्मुखापन्निवारकत्व कथनेन चतुर्मुखा पेक्षया विष्णोः परत्वमप्यसूचयत् । इत्थं शिवाच्चतुर्मुखाच्च विष्णोः श्रेष्ठतां कथयतोस्य मुने र्लोके सकलसुरासुर मनुजसंघेभ्य श्श्रेष्ठतया सम्भावयितुमर्हाभ्यां ब्रह्मशिवाभ्यामप्यस्योत्कृष्टतया तयो स्सर्वस्मात्परत्वासम्भवेन परिशेषाद्विष्णु रेव सर्वस्मात्पर इत्यभिप्रायः । इममर्थं हृदिनिधायैव ताभ्यां विष्णोः परत्वं भंग्यन्तरेणा सूचयदिति ।

" तत्रादौ बालकाण्ड " इत्यारभ्यैतावता प्रबन्धेन बालकाण्डगतान् विष्णोः परत्वसाधकान् हेतून् संगृह्य, अथा योध्याकाण्डगतान् तान् "श्रुत्वे" त्यादिना संगृह्णाति ।

श्रुत्वारामाभिषेकं श्रियमभिलषितां प्रार्थयन्तीसुतस्य
प्राणायामेणदध्यौ सहनियमभरैः पूरुषंराममाता ।
इत्थंस्पष्टंब्रुवाणः प्रकटयतिमुनि श्श्रीपतिंकारणत्व
व्याप्तध्येयत्वयोगादपिकिल परमं ब्रह्मकाण्डेद्वितीये॥८॥

(श्रुत्वेति) 'राममाता' - कौसल्या । 'रामाभिषेकं'-रामस्य, अभिषेकं- यौवराज्याभिषेकं, भाविनम् । 'श्रुत्वा' – आकर्ण्य, "सुतस्य" – तनयस्य रामचन्द्रस्य, "अभिलषितां' – अभीप्सिताम् । "श्रियम्' – सम्पदम् । 'प्रार्थयन्ती' – याचमाना । 'प्राणायामेण' – प्रणायामपूर्वकम् । 'सहनियमभरैः' – नियमातिशयैस्सह । 'पूरुषम्' – पुरुषशब्दवाच्यं भगवन्तमन्तर्यामिणं नारायणम् । 'दध्यौ' – अध्यायत् । 'इत्थं' – एवं प्रकारेण ; 'स्पष्टं' – स्फुटं यथा तथा । 'ब्रुवाणः'- कथयन् । 'मुनिः' – वाल्मीकिः । 'श्रीपतिं' – लक्ष्मीपतिं नारायणम् । "कारणत्व व्याप्तध्येयत्वयोगात्" – कारणत्व व्याप्तस्य- जगत्कारणत्वेन व्याप्तस्य, ध्येयत्वस्य- उपास्यत्वस्य, योगात- सम्बन्धात् । 'परमं' - सर्वोत्कृष्टं, 'ब्रह्म'- बृहति बृंहयतीति निरुक्तब्रह्मशब्दप्रवृत्ति निमित्ताश्रयम् । 'द्वितीयेकाण्डेपि' – अयोध्याकाण्डेपि ! 'प्रकटयति' - प्रकाशयति । किलेति प्रसिद्धौ ।

श्रीरामायणे ऽयोध्याकाण्डे चतुर्थेसर्गे –

" तत्र तां प्रवणामेव मातरं क्षौमवासिनीम् ।
वाग्यतां देवतागारे ददर्श याचतीं श्रियम् ॥
प्रागेव चागता तत्र सुमित्रा लक्ष्मण स्तथा ।
सीता चानायिता श्रुत्वा प्रियं रामाभिषेचनम् ॥
तस्मिन् काले हि कौसल्या तस्था वामीलितेक्षणा ।
सुमित्रयान्वास्यमाना सीतया लक्ष्मणेन च ॥

श्रुत्वा पुष्येण पुत्रस्य यौवराज्याभिषेचनम् ।
प्राणायामेण पुरुषं ध्यायमाना जनार्दनम् ॥ "

इति परेद्युवि पुष्ययोगेन रामस्य यौवराज्याभिषेको भविष्यतीत्यवगत वृत्तान्ता कौसल्या पुत्रस्य सम्पद मभिलषन्ती देवतागारे क्षौमवाससत्व वाचंयमत्वादि नियमै स्सह प्राणायामपूर्वकं पुरुषशब्दवाच्यं ध्यायन्ती निमीलितनयना तस्था वित्युक्तम् । अत्र च कौसल्यया ध्यातः पुरुषशब्दवाच्यो भगवा न्नारायण एव,

" स यत्पूर्वोस्मा त्सर्वस्मा त्सर्वा न्पाप्मन औषत् । "

इति श्रौतानिर्वचनेन,

" पूस्संज्ञेषु शरीरे स्मिन् शयना त्पुरुषो हरिः ।
शकारस्य षकारोयं व्यत्ययेन प्रयुज्यते ॥
यद्वा पुरे शरीरे स्मि न्नास्ते स पुरुषो हरिः ।
यदि वा पुरवासीति पुरुषः प्रोच्यते हरिः ॥
यदि वा पूर्वमेवास मिहेति पुरुषं विदुः । "

इत्यादिस्मार्तनिर्वचनैश्च पुरुषशब्दस्य भगवति नारायण एव योगरूढत्वाव गमात् । सचासौ पुरुषशब्दवाच्यो विष्णु र्नारायणो ध्येयतया त्र प्रोक्तः । ध्येयत्वं च " कारणन्तु ध्येय " इत्यथर्वशिखायां जगत्कारणभूतस्यैव वस्तुनोध्येयत्व विधाना त्कारणत्वव्याप्तम् ।

जगत्कारणत्वं च —

" यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति,
यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व तद्ब्रह्मेति । "

इति श्रुत्या परब्रह्मणो लक्षण मवगतम् । सूत्रकारेण च भगवता बादरायणेन ' जन्माद्यस्य यतः ' इति ब्रह्मणो जगज्जन्मादिकारणत्वं लक्षणतया सूत्रितम् । एवं च ब्रह्मलक्षणभूतजगत्कारणत्वव्याप्तध्येयत्वेत्र विष्णोः प्रतिपाद्यमाने तादृश ध्येयत्वव्याप्तजगत्कारणत्वहेतुना विष्णुः परं ब्रह्मेतिसाधितं भवति मुनिनेतिभावः ।

अथ " धर्मज्ञसमयः प्रमाणं " ' वेदाश्च ' " वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् । आचार श्चैव साधूना मात्मन स्तुष्टि रेव च ॥ " [मनुस्मृतिः - अ- २ श्लो- ६] " श्रुतिस्स्मृति स्सदाचार स्स्वस्य च प्रिय मात्मनः " [याज्ञवल्क्यस्मृतिः आ- श्लो ७] इत्यादिप्रमाणोक्तधर्मज्ञसमयरूपप्रमाणेन विष्णोः परत्वं वक्ष्यन् धर्मज्ञशिरोमणे श्रीरामचन्द्रस्या नुष्ठानप्रकार माह (राम श्रीमानिति)

राम श्रीमा न्महिष्या सह जनकभुवा भाविनि श्वोभिषेके
भक्त्या नारायणं तं विधिवदुपजगामात्मन श्श्रेय इच्छन् ।
अग्नावाज्यं जुहाव ज्वलति च महते दैवतायाथ शिश्ये
तं ध्यायन्नालयेस्येत्यभिदध दवद त्सर्वसेव्यं मुरारिम् ॥९॥

' श्रीमान् रामः ', ' महिष्या ', ' जनकभुवा ' — जनकतनयया, 'सह', ' अभिषेके श्वो भाविनि ' सति, ' तं ' - प्रसिद्धं निगमान्तेषु , ' नारायणं ' , ' आत्मन श्श्रेय इच्छन् ' सन्, ' विधिवत् ' - यथाविधि, ' भक्त्या ' - भक्तिपूर्वकम्, ' उपजगाम ' — उपासांचक्रे । ' ज्वलत्यग्नौ ' ' महते दैवताय ' — ' वेदाह मेतं पुरुषं महान्त ' मिति प्रसिद्धं भगवन्तं नारायण मुद्दिश्य, ' आज्यम् जुहाव ' । ' अथ ' - अनन्तरं । ' अस्य ' - भगवतो नारायणस्य । ' आलये ' । ' तं ध्यायन् ' - नारायण मेव ध्यायन् सन् । ' शिश्ये ' । ' इति ' - एवम्प्रकारेण, ' अभिदधत् ' - वदन् मुनि र्वाल्मीकिः । मुरारिं - विष्णुमेव । सर्वैः सेव्यं अवदत् ।

श्रीरामायणे ह्ययोध्याकाण्डे षष्ठे सर्गे भगवान् श्रीरामचन्द्रः परेद्यवि पुष्ययोगेनात्मनो यौवराज्याभिषेकं राज्ञा चिकीर्षित मवगत्य, तेनैव प्रहिते कुल

पुरोहिते वसिष्ठेऽभिषेकांगतया कर्तव्यमुपवासादिक्रियाकलापं यथाविधि कारयित्वा निष्क्रान्ते आत्मनः श्रेयोभिलषन् अन्यदेवतावैमुख्येन भगवन्तं नारायणमेवोपासा म्बभूव यथाविधीति

" गते पुरोहिते राम स्स्नातो नियतमानसः ।
सह पत्न्या विशालाक्ष्या नारायण मुपागमत् ॥ "

इत्यादिग्रन्थेन प्रतिपादितम् । तत्र च —

" सह पत्न्या विशालाक्ष्या नारायण मुपागमत । "
" वाग्यत स्सह वैदेह्या भूत्वा नियतमानसः । "

इति वचनद्वयार्थ मभिप्रेत्य 'महिष्या सह जनकभुवा' इत्युक्तम ।

" अद्य चन्द्रोऽभ्युपगतः पुष्या त्पूर्वं पुनर्वसू ।
श्वः पुष्ययोगं नियतं वक्ष्यन्ते दैवचिन्तकाः ॥
ततः पुष्येऽभिषिंचस्व मन स्त्वरयतीव माम् ।
श्व स्त्वाह मभिषेक्ष्यामि यौवराज्ये परन्तप ॥ "

इति रामचन्द्रं प्रति दशरथस्योक्ति ,

" अम्ब पित्रा नियुक्तोस्मि प्रजापालनकर्मणि ।
भविता श्वोभिषेको मे यथा मे शासनं पितुः ॥ "

इति कौसल्यां प्रति श्रीरामचन्द्रवचनं,

" सन्दिश्य रामं नृपति श्श्वोभाविन्यभिषेचने ।
पुरोहितं समाहूय वसिष्ठ मिद मब्रवीत् ॥ "

इति वचनं ,

" प्रात स्त्वामभिषेक्ता हि यौवराज्ये नराधिपः ।
पिता दशरथः प्रीत्या ययातिं नहुषो यथा ॥ "

इति रामचन्द्रं प्रति वसिष्ठवचनं चाभिप्रेत्य 'भाविनि श्वोभिषेके' इत्युक्तम् ।

' नारायणमुपागमत् ' इत्यत्र ' नारायण ' शब्दं प्रत्यभिज्ञापयितुं अत्र ' नारायणन्तमि ' ति, ' उपागमत् ' इति पदं प्रत्यभिज्ञापयितुं अत्र ' उपजगाम ' इति चोक्तम् ।

" **गतेपुरोहितेरामः स्नातोनियतमानसः ।** "

इत्यत्र ' नियतमानस ' इति पदार्थं हृदिनिधाय ' भक्त्या ' इति,

" **प्रगृह्यशिरसापात्रीं हविषाविधिवत्तदा ।** "

इत्यत्र ' विधिवदि ' ति पदार्थमभिसन्धाय ' विधिवदि'ति,

" **शेषं च हविषस्तस्य प्राश्याशास्यात्मनःप्रियम् ।** "

इत्यत्र ' आशास्यात्मनः प्रियं ' इति पदार्थमभिसन्धाय ' आत्मनः श्रेय इच्छन् ' इति,

" **महतेदेवतायाज्यं जुहावज्वलितेनले ।** "

इति वचनमभिप्रेत्य ' अग्नावाज्यं जुहावज्वलतिचमहते देवताय ' इति ,

" **श्रीमत्यायतनेविष्णो श्शिश्येनरवरात्मजः ।** "

इति वचनार्थमभिसन्धाय ' अस्यालयेशिश्ये ' इति ,

" **ध्यायन्नारायणन्देवं स्वास्तीर्णेकुशसंस्तरे ।** "

इति वचनोक्तार्थमभिप्रेत्य ' तंध्यायन्नि ' ति चोक्तम् ।

इदंच नारायणार्चनध्यान तदुद्देश्यकहोमादिकथनम्

" **तुष्टावप्रणतश्चैव शिरसामधुसूदनम् ।** "

इति वचनोक्तयोः स्तुतिप्रणामयोरप्युपलक्षणम् । तदेवं निजश्रेयोर्थिना रामचन्द्रेण धर्मसंस्थापनार्थं कृतावतरणेन धर्मज्ञाग्रेसरेण नारायणस्यैवाभिगत त्वादन्यैरपि सएवाभिगम्योध्येयश्चेति सिद्धम्भवति । धर्मज्ञाग्रगण्येन नारा-

यणस्यैव परत्वबुद्ध्यार्चितत्वा त्सएव धर्मज्ञसमयरूपप्रमाणेनापि परंतत्वमिति निश्चितम्भवतीति सिद्धम् ।

तदिहास्मदादीनां धर्मज्ञसमयएव प्रमाणम् इत्युक्त्या विष्णोस्सार्वसेव्यत्व मनेन प्रमाणेन प्रतिपादितं भवतीति भावः ।

अथान्यदपि रामचन्द्रस्यानुष्ठानं प्रदर्शयता अर्थाद्गायत्री प्रतिपाद्यत्वमपि विष्णोरेवेति सूचितम्भवतीति तन्मुखेनापि परत्वंसिद्ध्यतीत्याह (ध्यायन्निति)

ध्यायन् सन्ध्याधिदेवं रघुपतिरजपत्सम्यगेकाग्रचेता
गायत्रीं तुष्टुवेच प्रणतनिजशिरा वासुदेवंसुरेड्यम् ।
इत्थं वल्मीकजन्मा मुनिरिहकथयन् स्पष्टमेवाभिचष्टे
गायत्रीवेद्यमाद्यं मधुरिपु मखिलोपासितंतत्वमग्र्यम् ॥

' रघुपतिः, सन्ध्याधिदेवं, ध्यायन् , एकाग्रचेतास्सन्, गायत्रीं, अजपत् ' । ' प्रणतनिजशिरास्सन् , सुरेड्यं, वासुदेवं, तुष्टुवेच । ' इत्थं कथयन् वल्मीकजन्मा मुनिः ' , ' मधुरिपुं ' - मधूहन्तारं भगवन्तं नारायणम् , ' गायत्री वेद्यं ' - गायत्रीप्रतिपाद्यम , ' आद्यं ' - अनादिं, सकलजगत्कारणंवा, ' अखिलोपासितं ' - अखिलैरुपासितम् , ' अग्र्यं' परमं; ' तत्वं ' 'स्पष्टमेव ' - स्फुटमेव ' अभिचष्टे ' कथयति । मधुरिपुरेव गायत्रीप्रतिपाद्यं परन्तत्वमिति मुनिः स्पष्टंसूचयतीत्यर्थः ।

अत्रेदं बोध्यं – अनुदिन माखिलै रपि द्विजै स्सन्ध्यासु जप्यमानाया गायत्र्या स्तावत्प्रतिपाद्यं परं ब्रह्मैवेति सर्वाभ्युपगतोय मर्थः ।

" आदित्यमण्डलस्थं तत्परंब्रह्माधिदैवतम् । "
छन्दो णिचृत्स्या द्गायत्री यया दृष्टा सनातनी ॥ "

इत्यादिभि र्गायत्रीदेवताप्रतिपादकै र्विश्वामित्रादिवचनै श्च गायत्र्याः परब्रह्म प्रतिपादकत्वं कण्ठोक्तम् । इत्थं परब्रह्मप्रतिपादकत्वेन निश्चिताया गायत्र्या यदि क्वचि त्प्रमाणे देवताविशेषप्रतिपादकत्व मुक्तं स्यात्, तर्हि तस्य देवता विशेषस्य परब्रह्मत्व मेव भंग्यन्तरेणोक्तं स्यात्, परब्रह्मभिन्नस्य गायत्रीप्रति पाद्यत्वानुपपत्त्या गायत्रीप्रतिपाद्यत्वेनोक्तस्य परब्रह्मत्वावश्यकत्वात् । तथा च श्रीरामायणे ऽयोध्याकाण्डे भगवतो नारायणस्य गायत्रीप्रतिपाद्यत्वकथनं तस्य परब्रह्मता मवगमयतीति ।

तथाहि — श्रीरामायणे ऽयोध्याकाण्डे षष्ठे सर्गे —

" पूर्वां सन्ध्या मुपासीनो जजाप यतमानसः ।
तुष्टाव प्रणत श्चैव शिरसा मधुसूदनम् ॥ "

इत्यस्मिन् श्लोके श्रीमतो रामचन्द्रस्य सन्ध्याशब्दवाच्य सन्ध्याधिदैवतभूत यत्किंचिद्देवताध्यानपूर्वकं गायत्रीजपानुष्ठानम्, ततो जपानन्तरं मधुसूदनस्तुति तत्प्रणामकर्तृत्वं च प्रतिपाद्यते । सामान्यतो लोके यस्य कस्य चिदपि वा मन्त्रस्य जपे नुष्ठीयमाने जपकाले जप्यमानमन्त्रप्रतिपाद्यदेवताध्यानं जपानन्तरं मन्त्रप्रतिपाद्यदेवतोपस्थानं च सम्प्रदायसिद्धं शास्त्रसिद्धं च । अनेनैव न्यायेन गायत्रीजपकालेपि गायत्रीप्रतिपाद्यदेवताध्यानं तज्जपानन्तरं च तत्प्रतिपाद्यदेवतो पस्थानं च प्राप्तम् । श्रीरामचन्द्रस्य प्रात स्सन्ध्योपासनसमये गायत्रीजपकाले तत्प्रतिपाद्यदेवताध्यानं तदनन्तरं तत्प्रतिपाद्यदेवतोपस्थानं च ' सन्ध्या मुपासीनः ' ' तुष्टाव प्रणत' इत्याभ्यां मुनिना प्रतिपादितम् । तत्र च उपस्थान समये मधुसूदनस्य भगवतो नारायणस्यैवोपस्थानं ' तुष्टाव मधुसूदन ' मित्य नेन स्पष्ट मुक्तम् । ' सन्ध्या मुपासीन " इति सामान्यत स्सन्ध्यापदप्रयोगे प्युत्तरत्र ' मधुसूदन ' मिति देवताविशेषवाचकपदस्योपात्तत्वा त्सन्ध्याशब्दोपि

तत्रैव पर्य्यवस्यतीति तस्यैव ध्यान मित्यपि सिद्धम् । इत्थं गायत्रीजपानन्तरं मधुसूदनशब्दवाच्य नारायणोपस्थानकथन मिदं मधुसूदनस्य गायत्रीप्रतिपाद्यत्व मन्तरानुपपन्नं तस्य गायत्रीप्रतिपाद्यत्वं सूचयति । तथा च गायत्रीप्रतिपाद्यत्व कथनमुखेन मुनिना परब्रह्मत्व मेव विष्णौ प्रतिपादित मिति ॥१०॥

अथ श्लोकद्वयेन प्रपंचितं विष्णोः परत्वसेव्यत्वादे र्धर्मज्ञ समयसिद्धत्वं निगमयति (इत्थमिति)

इत्थंलोकेत्र मायाधृतनरवपुषं धर्मसंस्थापनार्थे
साक्षान्मूर्तंचधर्मं रघुकुलतिलकं माधवैकान्तभक्तम् ।
व्याचक्षाणो मुनीन्द्रः स्फुटयतिसुधियां श्रीपतिंसेवनीयं
सिद्धंधर्मप्रमाणे मुनिपरिगणिते ष्वादिमे सर्वमान्ये॥

' इत्थं ' - श्लोकद्वयोक्तप्रकारेण । ' अत्रलोके ' - मनुष्यलोके । ' धर्मसंस्थापनार्थे ' - पितृवचनपरिपालनादिरूपस्य सामान्यधर्मस्य, शरणागतरक्षणादि रूपस्य विशेषधर्मस्य च स्थापनाय । अनेन —

" परित्राणायसाधूनां विनाशायचदुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामियुगेयुगे ॥ "

इति भगवद्गीतासूक्तिस्स्मार्यते । ' मायाधृतनरवपुषं ' - मायया - संकल्प रूपेण ज्ञानेन, ' मायावयुनं ज्ञान ' मिति मायाशब्दस्य ज्ञानशब्देन पर्याय पाठा ज्ज्ञानविशेषात्मक स्संकल्पोत्र मायाशब्देन विवक्षितः; धृतं — स्वीकृतं, नर वपुः- मनुजसजातीयतया परिणमितः दिव्यविग्रहः, येन, तथोक्तम् ; संकल्प मात्रायत्ता कर्मकृत मनुजसंहनन मित्यर्थः । अनेन ' प्रकृतिंस्वामधिष्ठाय

सम्भवाम्यात्ममायये ' ति सूक्त्यर्थ स्सूचितः । (साक्षान्मूर्तं च धर्ममिति) ' रामो विग्रहवान् धर्मः ' इत्युक्तप्रकारेण पिण्डीभूतधर्मरूप . मित्यर्थः । ' कृष्णं धर्मं सनातनं । ' इतिवत् अलौकिकसकलपुरुषार्थ सार्थ साधनतया धर्म शब्दवाच्यं परं ब्रह्मैव रामरूपेणावतीर्णमितिभावः । आभ्यां च विशेषणाभ्यां साक्षाद्धर्मभूततया उपदेशानुष्ठानाभ्यां धर्मसंस्थापनायैव विहितावतारतया च

> " अथयदिते कर्मविचिकित्सावा वृत्तविचिकित्सावास्यात् । ये तत्र ब्राह्मणास्सम्मर्शिनः । युक्ता आयुक्ताः । अलूक्षाधर्मकामा स्स्युः । यथा ते तत्र वर्तेरन् । तथा तत्र वर्तेथाः । "

इत्युक्तप्रकारेण श्रीरामचन्द्रानुष्ठानसिद्धार्थएव सर्वैरपि वैदिक धर्मनिष्ठै रनुसर्तव्यइति सिद्धं भवति । (रघुकुलतिलकमिति) रघुवंशजानां धर्मप्रधानतया तत्कुलप्रसूतेनानुष्ठितोर्थः प्रामाणिकतम एवेति भावः । ' रघुकुलतिलकं ' - श्रीरामचन्द्रम् । ' माधवैकान्तभक्तं ' - माधवस्य — लक्ष्मीपते र्नारायणस्य, एकान्तभक्तं- अनन्यभक्तम् । ' व्याचक्षाणः ' - कथयन् । ' मुनीन्द्रः '- वाल्मीकिः । ' श्रीपतिं ' लक्ष्मीपतिं । ' मुनिपरिगणितेषु '- मुनिना- आपस्तम्बेन, परिगणितेषु- धर्मप्रमाणत्वेनोक्तेषु प्रमाणेषु । 'आदिमे'- प्रथमे, प्रथमपरिगणित इत्यर्थः । आपस्तम्बो हि मुनिः - ' धर्मज्ञसमयः प्रमाणम् ' ' वेदाश्च ' इति धर्मप्रमाणपरिगणनावसरे धर्मज्ञ समय मेव प्रथमंपरिगणयामास, परस्तात्तु वेदान् । एवं परिगणयतोहि मुने रस्मदादीनां वेदार्थनिर्धारणाकुशलानां मन्वादिधर्मज्ञसमय एव धर्मनिर्णये शरण मित्यभिप्रायो वगम्यते, अन्यथाहि वेदानेव प्रथमं पर्यगणयिष्यत् । " सर्व मान्ये " - सर्वै र्माननीये । ' अथ यदि ते कर्मविचिकित्सा वा ' इत्यादिश्रुति स्मृतिभि र्हि धर्मज्ञानां सता माचरण मनुसरणीयं सर्वै रित्युपदिश्यते । ' धर्म

प्रमाणे ' — सदनुष्ठानरूपे । ' सिद्धं ' । ' सुधियां ' — सम्यज्ज्ञानयुतानां युक्तायुक्तविवेकपटूनां सताम् । ' सेवनीयम् ' - भजनीयम । ' स्फुटयति ' — स्फुटीकरोति । शिष्टाचारेणापि श्रीपति रेव सतां सेवनीय इति सिद्धयतीति मुनिः स्फुटीकरोतीत्यर्थः । पितृवचनपरिपालनादिषु सामान्यधर्मेषु शरणागत रक्षणादिषु विशेषधर्मेषु च निरतस्य धर्मसंस्थापानार्थ मेव कृतावतरणस्य स्वानुष्ठानेन धर्मानुष्ठानप्रकारं प्रचिकटयिषतो धर्मप्रधाने कुले जातस्य श्रीरामचन्द्रस्य भगवति नारायण एव भक्तिभरावगमा दन्येषा मपि स एव सेवनीय इति सिद्ध्यतीति भावः ॥११॥

इत्थ मयोध्याकाण्डगतान् हेतून् संगृह्य, अथारण्यकाण्डगतं तमाह (गृध्राधीशायेति)

गृध्राधीशाय लोकानदिश दपुनरावर्तिनो राघवात्मा
शार्ङ्गीत्यारण्यकाण्डे मुनि रनुकथय न्मोक्षदत्वं मुरारेः ।
पक्षे व्याप्यस्य सत्त्वं गमयति नियतं व्यापकस्यापि सत्ता
मित्येतन्न्यायतस्स्म स्फुटयति परमं ब्रह्मनारायणं तम् ॥

' राघवात्मा ' शार्ङ्गी ' — रामरूपेणावतीर्णो लक्ष्मीपति र्विष्णुः । ' गृध्राधीशाय ' - जटायुषे । ' अपुनरावर्तिनो लोकान् ' - ' नच पुनरावर्तते नच पुनरावर्तत ' इत्याद्युक्तप्रकारेण पुनरावृत्तिरहितान् परमपदपरंधामादि शब्दितान् वैकुण्ठाख्यान् लोकान् । ' अदिशत् ' - अदात । ' इति ' - एव म्प्रकारेण । ' मुरारेः ' - विष्णोः । ' मोक्षदत्वं ' - मुक्तिदातृत्वम् । ' आरण्य काण्डे ' । ' अनुकथयन् ' - वदन् । ' मुनिः ' - वाल्मीकिः । ' पक्षे ' - सन्दिग्ध साध्यके धर्मिणि । ' व्याप्यस्य सत्त्वं ' — व्याप्तिविशिष्टस्य सम्बन्धः । ' व्याप

कस्य सत्तां ' — व्यापकवस्तुमत्त्वम् । ' नियतं गमयति ' — निश्चितं ज्ञापयति । ' इत्येतन्नयायतः ' — एतादृशेन न्यायेन । ' तं ', — प्रसिद्धम् । ' नारायणं ' । ' परमं ब्रह्म ' — परब्रह्म । ' स्फुटयति ' - प्रकाशयतिस्म ।

धर्मिणि तद्व्याप्यधर्मवत्ताज्ञानस्य व्यापकतद्धर्मवत्ताज्ञानजनकत्व मिति न्याया त्परब्रह्मत्वव्याप्यमुक्तिप्रदत्वस्य विष्णौ कथना त्तस्य परब्रह्मत्वमुक्त मेवेति भावः ।

' यमेवैषवृणुते तेन लभ्यः ' ' एषह्येवानन्दयाति ' 'अमृतस्यैषसेतुः' 'अमृतस्य परंसेतुं' इत्यादि श्रुतिस्मृतिभि र्मोक्षप्रदत्वं परब्रह्मत्वव्याप्यतया प्रतिपादितम् । भगवता च बादरायणेन ' फलमतउपपत्तेः ' इति ब्रह्मण एव सकल फलप्रदत्व व्यवस्थापनमुखेन मुक्तिप्रदत्वं परब्रह्मैकान्तं व्यवस्थापितम् । इत्थं परब्रह्मान्यागामितया परब्रह्मताव्याप्यं मुक्तिप्रदत्वं श्रीमति रामायणे आरण्यकाण्डेऽष्टषष्टितमेसर्गे रामात्मनावतीर्णस्य विष्णोः प्रतिपाद्यमानं तस्य परब्रह्मतामवगमयति । धर्मिणि तद्व्याप्यसत्ताया व्यापकतत्सत्तागमकत्वस्यानुभवसिद्धत्वात् ।

तत्र हि सीतापहारानन्तरं सीतामन्विष्यतो जटायुषोमुखाच्छ्रुतं सीतापहारवृत्तान्तस्य श्रीरामचन्द्रस्य

" मम हेतो रयं प्राणा न्मुमोच पतगेश्वरः "

इति मोक्षप्रदानोपयुक्त भक्त्याद्यभावेपि स्वार्थ प्राणत्यागमेव मोक्षप्रदानपर्याप्तं हेतु मभिसन्धाय,

" यागति र्यज्ञशीलाना माहिताग्नेश्च यागतिः ।
अपरावर्तिनां याच याच भूमि प्रदायिनाम्॥

मयात्वं स मनुज्ञातो गच्छलोका ननुत्तमान् ।
गृध्र राज महासत्व संस्कृतश्च मयाव्रज ॥ "

इत्यादिना अपुनरावर्त्तिमुक्तप्राप्य लोकविशेषप्रदातृत्वं प्रतिपादितम् ।

अत्र च ' यज्ञशीलानां '- यज्ञानुष्ठानपराणां, ' यागतिः '- लोकः, ' आहिताग्ने र्यागतिः ', ' भूमिप्रदायिनां याच गतिः ', ताः, ' मया सम नज्ञात स्वं गच्छ ' - तेषां लोकानप्यानुषंगिकतया मध्येप्राप्नुहि, ततश्च ' मयासंस्कृत ' स्सन् , ' अपरावर्तिनां '- ' नच पुनरावर्तत ' इत्युक्तानाम् मुक्तानां, ' यागतिः ', ' ताननुत्तमान् लोकान् '— ' अथयदतः परोदिवो ज्योति र्दीप्यत ' इत्यादि श्रुत्युक्तान् बहुधा विभक्तान् वैकुण्ठाख्यान् लोकान्, ' व्रज '- प्राप्नुहि । इत्यर्थे ' अपरावर्तिनां याचे ' इति मध्यपठितस्यान्ते समाकर्षणं, विवक्षितार्थलाभाय क्रियमाणं नदोषाय ।

' यज्ञशीलानां '- यज्ञानुष्ठानपराणां गृहस्थानां, 'यागतिः', 'आहिताग्नेः' - परितस्थापिताग्नेः, पंचाग्निमध्य तपोनिष्ठस्य वानप्रस्थस्येत्यर्थः, ' यागतिः ', ' अपरावर्तिनां '- ' आरण्यमियात्ततो न पुनरेया ' दित्युक्तानां सन्न्यासिनां, ' यागतिः ', ' भूमिप्रदायिनां '- नैष्ठिकानां, ' यागतिः ', ताः, ' मयात्वं समनुज्ञातो गच्छ ', तन्मार्गेण, ' मया संस्कृत ' स्सन् , ' अनुत्तमान् ' - ' अथ यदतः परोदिवोज्योति र्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेष्वि ' त्यादिश्रुतिप्रसिद्धान् मुक्तप्राप्यान् वैकुण्ठाख्यान् लोकान् । ' व्रज ' - प्राप्नुहि ! इत्यस्मि न्नर्थे न कस्यचिद्दोषस्य प्रसक्तिरपि । अत्राद्ये कल्पे ऽपरावर्तिसम्बन्धित्वेन प्रतिपाद्यमानतया ते लोका मुक्तप्राप्या लोका एव । द्वितीयेपि कल्पेऽनुत्तमत्वेन प्रतिपाद्यमानतया ते लोका वैकुण्ठाख्या मुक्तप्राप्या लोका एव । तादृशा श्च लोका गृध्रराजाय भगवता रामचन्द्रेण दत्ता

इति मुक्तिप्रदत्व मत्र प्रतिपाद्यम् । मुक्तिप्रदत्वं च परब्रह्मैकान्तम् । तस्य च मुक्तिप्रदत्वस्य परब्रह्मत्वव्याप्यस्यात्र विष्णौ रामचन्द्ररूपे प्रतिपादना त्तन्मुखेन तद्व्यापकीभूतपरब्रह्मत्वकथन मेव मुने रभिप्रेत मिति सर्वं मवदातम् ॥१२॥

एवं तत्रैवान्यानपि हेतून् संगृह्णाति (किंचेति)

किंचाभीतिप्रदाना च्छरणमुपगतेभ्य श्शरण्यस्वभावात्
संहारे सृष्टिकर्मण्यपि किल शकना न्मूर्तधर्मत्वकीर्तेः ।
तेजस्तद्व्यप्रमेयं जनकतनुभवा यस्य सेत्युक्तिरीते
श्शक्तेस्सूर्यादिरोधे सुगतिवितरणे चावदद्ब्रह्मरामम् ॥

' सर्वे ब्राह्मया श्रिया जुष्टा दृढयोगा स्समाहिता ' इत्युक्तेभ्यः तत्वज्ञेभ्यः ' तत स्त्वां शरणार्थं च शरण्यं समुपस्थिताः ' इति शरणागतेभ्यः ' दत्वा भयं सोथ तपोधनानां धर्मे धृतात्मा सह लक्ष्मणे ' नेति षष्ठसर्गे श्रीरामेण कृत मभयप्रदानं शरणागतै स्तै रुपपादितं शरण्यत्वं च रामस्य परब्रह्मतां बोधयतः ।

" संहृत्य चपुनर्लोकान् विक्रमेण महायशाः ।
शक्तस्सपुरुषव्याघ्र स्स्रष्टुंपुनरपिप्रजाः "

इत्येकत्रिंशे कम्पनवाक्यनुखेन प्रतिपादितं सृष्टिसंहारशक्तत्वं ' जन्माद्यस्य यत ' इति सूत्रयता ब्रह्मलक्षणत्वेन सूत्रितं श्रीरामस्य परब्रह्मत्वमन्तरा न घटत इति स्पष्टमवगमयति तस्य ब्रह्मरूपत्वम् ।

' रामोविग्रहवान् धर्मः ' इति सप्तत्रिंशे मारीचस्य वाक्येन श्रीरामस्य धर्ममूर्तित्व कथनं सर्वधर्मसमाराध्यत्वेऽलौकिक निश्श्रेयससाधनत्वेन धर्मरूपत्वेवा पर्यवसन्नं ब्रह्मणोसाधारणधर्मइति,

" अप्रमेयंहितत्तेजो यस्यसाजनकात्मजा "

इति तस्यैववाक्येनोपपादितं निरतिशयतेजोरूपत्वं ' अथयदतः परोदिवोज्योति र्दीप्यते' इत्यादिषुब्रह्मधर्मतया स्पष्टमुद्घुष्यतइति ते रामरूपस्य विष्णोः परमात्मत्वं बोधयतः ।

" सन्निरुद्धग्रहगण मावारितनिशाकरम् ।
विप्रणष्टानलमरु द्भास्करद्युतिसंवृतम् ॥ "

इत्यादिना चतुष्षष्टितमेसर्गे प्रतिपादितं सूर्यचन्द्रादि निरोधक्षमत्वं,

" भीषास्मा द्वातः पवते । भीषोदेति सूर्यः । भीषास्मा दग्नि श्चेन्द्र श्च । मृत्यु र्धावति पंचमः "

इति तैत्तीरीयश्रुत्युक्ते सूर्यादिप्रशास्तृत्वे पर्यवसितं श्रीरामरूपेणावतीर्णस्य विष्णोः परब्रह्मतायां साधक मेव ।

समये स्वेश्वरभावस्य स्वय मेवाविष्करण मितिहासशैलीसिद्धम् ।

" पिशाचान् दानवान् यक्षान् पृथिव्यां येच राक्षसाः ।
अंगुळयग्रेण तान् हन्या मिच्छन् हरिगणेश्वर ॥ "

— इति किल प्राह ।

" मामेव विजानीह्येतदेवाहं मनुष्याय हिततमं मन्ये यन्मां विजानीयात् त्रिशीर्षाणं त्वाष्ट्रमहनमरुन्मुखा न्यतीन् सालावृकेभ्यः प्रायच्छम्,.....प्राणोस्मि प्रज्ञात्मा, तं मा मायु रमृत मुपास्व । "

इत्यादिषूपनिषत्स्वपि शैलीय मनुश्रूयते ।

" चक्षुषा तव सौम्येन पूतास्मि रघुनन्दन ।
गमिष्या म्यक्षयान् लोकान् त्वत्प्रसादा दरिन्दम ॥ "

इति चतुस्सप्ततितमेसर्गे शबरीवाक्येन प्रतिपादितं अक्षयलोकप्रदत्वं मोक्षप्रदत्वरूपं ' एषह्येवानन्दयाति ' इत्यादि श्रुति शतगदितं परस्यैव ब्रह्मणो साधारणोधर्म इति पूर्वमेव निरूपितम् । तेनच रामरूपो नारायणएव परंब्रह्मेति सुष्ठूपपादितं भवतीति भावः ।

इत्थ मारण्यकाण्डगतान् हेतून् संगृह्य किष्किन्धाकाण्डगतान् तान् संगृह्णात्येकेन श्लोकेन (किष्किन्धाख्य इति)

किष्किन्धाख्येच काण्डे श्रुतिशिखरगतै र्दुर्लभत्वाप्रमेय
त्वाद्यै र्धर्मै रकंप्यैरनितरगतिकै स्तारयोक्तै रनेकैः ।
साधूनां त्राणहेतो र्दशरथतनयत्वेन विश्वम्भरायां
जातं कान्तं रमाया अचकथत परं ब्रह्मवल्मीकजन्मा ॥

" वल्मीकजन्मा, साधूनां त्राणहेतोः, विश्वम्भरायां दशरथतनयत्वेन जातं रमायाः कान्तं, किष्किन्धाख्येकाण्डे, तारयोक्तैः, श्रुतिशिखरगतै रकम्प्यै रनितरगतिकै र्दुर्लभत्वाप्रमेयत्वाद्यै रनेकै र्धर्मैः, परं ब्रह्म,अचकथत" इत्यन्वयः ।

किष्किन्धाकाण्डे चतुर्विंशे सर्गे श्रीरामं प्रति तारावाक्यम् —

" त्व मप्रमेय श्च दुरासद श्च जितेन्द्रिय श्चोत्तमधार्मिक श्च ।
अक्षय्यकीर्तिश्च विचक्षणश्च क्षितिक्षमावान् क्षतजोपमाक्षः॥ "

— इति ।

अत्रा प्रमेयदुरासदजितेन्द्रियोत्तमधार्मिकाक्षय्यकीर्तिविचक्षणक्षितिक्षमावत्क्षतजोपमाक्षपदैः प्रतिपादिता धर्मा ' दुर्लभत्वाप्रमेयत्वाद्यै ' रित्यनेन संगृहीताः । तत्राप्यप्रमेयदुरासदशब्दोक्तौ धर्मौ दुर्लभत्वाप्रमेयत्वशब्दाभ्या मुक्तौ । अन्येचा दिपदेन संगृहीताः ।

तत्राप्रमेयत्वं करणैः प्रमातु मशक्यत्वं। सच परब्रह्मणो साधारणो धर्मः, " सो अंग वेद यदि वा न वेद " इति श्रुत्या भगवत्स्वरूपस्य भगवताप्यवेद्यत्व प्रतिपादनात्, ' क इत्थावेदयत्र सः ' इति वेदैरपि ब्रह्मणो ऽपरिच्छेद्यता प्रतिपादनात् ।

" नसशक्य स्त्वया द्रष्टुं मयान्यैर्वापि सत्तम ।
सगुणो निर्गुणो विश्वो ज्ञानदृश्योह्यसौस्मृतः ॥ "

इति महाभारत ब्रह्मरुद्रसंवादगतवचनेन ब्रह्मणोतीन्द्रियता प्रतिपादनात् ।

" तवान्तरात्मा ममच येचान्येदेहिसंज्ञिताः ।
सर्वेषां साक्षिभूतोसौ नग्राह्यःकेनचित्कचित् ॥ "

इत्य ग्राह्यता प्रतिपादनाच्च ।

दुरासदत्वं च दुर्लभत्वम् । तदपि " नायमात्माप्रवचनेन लभ्यो न मेधया न बहुनाश्रुतेन । यमे वैषवृणुते तेन लभ्य " इत्यादि श्रुति स्मृतिभिः परब्रह्मा साधारणधर्मतयावगतम् ।

जितेन्द्रियत्वंचेन्द्रियानधीन सर्ववस्तु साक्षात्कारक्षमत्वम् । तच्च " पश्य त्यचक्षु स्सशृणोत्यकर्णः " " अपाणिपादोजवनोगृहीता " इत्यादि श्रुति स्मृतिभिः परब्रह्मणो साधारणधर्मतया प्रतिपादितम् ।

उत्तमधार्मिकत्वं च स्वार्थनिरपेक्षपरार्थ प्रवृत्तिमत्त्वं । तदपि -

" परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥ "
" नमेपार्थास्तिकर्तव्यं नमेकर्मफले स्पृहा ॥ "

इत्यादिना भगवदसाधारणतया गीतम् ।

अक्षय्यकीर्तित्वं च " तस्यनाम महद्यश " इति ब्रह्मासाधारण मागमान्तगम्यम् ।

विचक्षणत्वमपि निरंकुश समाभ्यधिक सर्वविधशक्तियुक्तत्वा द्भगवदसाधारणम् । यद्वा- विचक्षणशब्दस्य पण्डितपर्याये नैखण्टुकपाठात् विचक्षणत्व

स्य ज्ञानरूपत्वेन असंकोचात् सर्वज्ञत्व पर्यवसन्नस्य " यस्सर्वज्ञ स्सर्ववित् " इत्यादिभिः परब्रह्मधर्मत्वं स्पष्टम् ।

क्षिति क्षमावत्त्वं क्षितितुल्यक्षमावत्त्वम् । तच्च सर्वसहत्वा द्ब्रह्मण स्तस्यासाधारणम् ।

क्षतजोपमाक्षत्वं पुण्डरीकाक्षत्व पर्यवसितम् । तच्च " तस्य यथाकप्यासं पुण्डरीकमेव मक्षिणी " इत्यादि श्रुत्या ब्रह्मणोसाधारणधर्मः । यद्वा लोहिताक्षत्व मेवास्तु, 'समावृषभोरोहिताक्ष स्सूर्योविपश्यन्मनसापुनातु ' इति श्रुते स्तदेव ब्रह्मणो धर्मः ।

त एते सर्वे ऽप्रमेयत्वादयो धर्मा रामात्मनावतीर्णे विष्णौ प्रतिपादिता इति तेतस्य परब्रह्मतांगमयन्ति ।

इत्थं किष्किन्धाकाण्डगतान् विष्णोः परब्रह्मत्वसाधकान् हेतून् संगृह्य ' काण्ड ' इत्यादि श्लोकद्वयेन युद्धकाण्डगतान् तान् संगृह्णाति ।

काण्डे षष्ठेमुनीन्द्र स्सरसिजनयनं कारणत्वाज्जगत्याः
स्वातन्त्र्याद्वैश्वरूप्यादपिनिखिलजगत्संहृतेर्व्यापकत्वात् ।
सर्वज्ञत्वा दनन्तेक्षणचरण शिरोवत्त्वत स्सर्वयज्ञा-
राध्यत्वा त्पुण्डरीकप्रभनयनतया वेदसंस्कारवत्त्वात् ॥

(काण्डइति) एतदादिश्लोकद्वयमेकान्वयम् । वाल्मीकिर्मुनीन्द्रः षष्ठेकाण्डे सरसिजनयनं परन्तत् ब्रह्मावदादित्यन्वयः ।

(कारणत्वाज्जगत्या इति) सकलजगदुत्पत्ति कारणत्वादित्यर्थः जगदुत्पत्तिकारणत्वं च परब्रह्मणोसाधारणधर्मः । तथा च श्रूयते तैत्तिरीये --

" यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति, तद्विजिज्ञास्व, तद्ब्रह्मेति "

— इति ।

अत्र च 'यतोवा इमानि भूतानि जायन्ते तद्ब्रह्मे' त्युक्त्या ब्रह्मणो जगज्जन्मकारणत्व मुक्तम्भवति, यत इति पंचम्याः कारणत्वार्थकत्वात् ।

ननु — जन्मकारणत्वमात्रस्य परब्रह्मासाधारणत्वोक्ति र्न संगच्छते, 'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभि संविशन्ति' इति वाक्यत्रयेण जन्मस्थितिलयान् निर्दिश्य 'तद्ब्रह्मे' ति तादृशवाक्यत्रयघटक यच्छब्दत्रयप्रतिनिर्देशभूतेनैकेनैव तच्छब्देन तादृशसमु दायकारणत्वं परामृश्य तस्यैव ब्रह्मलक्षणताप्रतिपादनात्, सूत्रकृता च भगवता बादरायणेन 'जन्माद्यस्य यत' इति ब्रह्मणो लक्षणं सूत्रयता ऽ दिशब्देन स्थितिलयावपि संगृह्य तादृशसमुदायकारणत्वस्यैव ब्रह्मलक्षणत्वकथनात्; भग वता च भाष्यकृता तद्गुणसंविज्ञानबहुव्रीहि माश्रित्य जन्मादीति सूत्रघटकं पदं 'सृष्टिस्थितिप्रळय' मिति व्याख्याय समुदायकारणत्वस्य तथात्वकथनात्; जन्मादिप्रत्येककारणत्वस्यैव ब्रह्मासाधारणत्वे तावन्मात्रस्यैव ब्रह्मलक्षणत्वसम्भ वेन उक्तश्रुतिसूत्रव्याख्यानाना मनुपपत्ते श्च; इति चेत् ?

अत्र केचित् — 'यतो वे' त्यादिश्रुतौ 'तद्ब्रह्मे' त्येकस्यैव श्रवणेपि तस्य यतो वा इमानि भूतानि जायन्ते तद्ब्रह्म, येन जातानि जीवन्ति तद्ब्रह्मे त्येवं वाक्यत्रये प्यनुसन्धाना त्प्रत्येककारणत्वस्यापि लक्षणत्वलाभसम्भवः । सूत्रे च जन्मादीति जन्मस्थितिलयानां ग्रहणेपि न समुदायस्य कारणत्वं विव क्षितं, किन्तु प्रत्येककारणत्व मेव । उदाहृतभाष्यं च कथंचिन्नेयम् । अन्यथा

प्रत्येककारणत्वस्यैव सकलेतरव्यावर्तकत्वेन समुदायकारणत्वविवक्षणवैयर्थ्या दित्याहुः ।

अयं च पक्षः पाराशर्यविजयादौ स्थितः । तथाच तत्रत्यो ग्रन्थः –

" अत्र जन्मकारणत्वादीनि प्रत्येक मेवेतरव्यावर्तनसामर्थ्या त्तथैव लक्षणानीति केचि दाचार्याः । "

– इति ।

परेतु – 'अधीहि भगवो ब्रह्मे' ति पूर्वं कृतस्य मुमुक्षु जिज्ञास्यं ब्रह्म किमिति शिष्यप्रश्नस्योत्तरतया 'यतो वे' त्यादिश्रुतिः प्रवृत्ता । तत्र यदि जन्मादिकारणत्वं प्रत्येक मेव लक्षण मुक्तं स्या त्तदा शिष्यस्य जिज्ञास्यब्रह्म निर्णयो न स्यात् , निरतिशयबृहत्त्वेना कारेण निर्णयस्य तद्विरोध्य बृहत्त्वशंका निराकरणं विनानुपपत्तेः । जन्मकारणत्वमात्रे भिहितेपि हि स्थित्यादिकारणभूत वस्त्वन्तरसद्भावा त्तत्कारणत्वोपयोगिगुणविशेषाभावा च्चाबृहत्त्वशंका जायेत । समुदायकारणत्वे चाभिहिते पूर्वोक्तशंकानवकाशा न्निरतिशयबृहत्त्वेनोपास्य ब्रह्मनिर्णयसम्भवा न्नानुपपत्तिः । तथा चोक्तसूत्रभाष्ये श्रुतप्रकाशिका –

" समुदायस्य लक्षणत्वं श्रुतिस्वारस्या दवसीयते । 'यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ती' त्यत्रहि न प्रतिवाक्यं तद्ब्रह्मे त्युक्तम् । अन्यथैकतरलक्षणवैयर्थ्यं च स्यात् । नच समुदितं लक्षणं, व्यावर्त्याभावात , नहि जगदुत्पत्तौ निमित्तोपादानभूतं स्थित्यादिकारणत्व व्यवच्छेद्यं किमपि वस्त्वस्ति । इति चेत् ? सत्यं, व्यवच्छेद्यं नेष्यते । तथापि श्रुत्यनुरोधा त्सूत्रकारेणैव मुक्तम् । श्रुति श्च 'तद्विजिज्ञासस्वे' ति विधित्सितोपासनोपयोगिनिरतिशय

बृहत्त्वविपरीता बृहत्त्वशंकाव्यवच्छेदार्थं समुदाय माह । शंकितव्यवच्छेदेनापिहि सप्रयोजनत्वं स्यात्, लक्ष्याकार विपरीतशंकानिराकरणेन विना लक्ष्याकारनिराकरणायो-गात् । नच जन्मादिष्वेकैककारणत्वं लक्ष्याकारविपरीत शंकानिराकरणक्षमं । तथाहि - उत्पत्तिकारणत्वे भिहितेपि स्थित्यादिकारणत्वं नचेत, तदनुगुणज्ञानशक्तिविरहा त्स्थितिप्रळयकारणभूत वस्त्वन्तरसद्भावा च्च जन्ममात्र कारणस्य निरतिशयबृहत्त्वं नः स्यात्, मुक्ते र्लयान्तर्भावा न्मोक्षप्रदतयोपास्यस्यैव प्राप्यत्वा च्च मोक्षप्रदत्वप्राप्यत्वानु गुणै गुणै श्च बृहत्त्वं न सिद्ध्यति, अतो जन्मकारणत्व मात्रस्य समस्तवस्तुव्यवच्छेदक्षमत्वेपि जन्मादिसमुदाय कारणत्वस्यैव निरतिशयबृहत्त्वौपयिकत्वा त्सृष्टिस्थिति प्रळयसमुदायकारणत्वं लक्षणमिति ज्ञापितम् । ”

— इति ।

अत्र च ‘ समुदायस्य लक्षणत्वं श्रुतिस्वारस्या दवसीयते ’ इत्यनेन ‘ यतो वे ’ त्यादिश्रुतौ ‘ यतो वे ’ त्यादिवाक्यत्रयानन्तरं ‘ तद्ब्रह्मे ’ त्येकस्यैव तच्छब्दस्य वाक्यत्रयघटक यच्छब्दत्रयप्रतिसम्बन्धित्वयोपादाना त्तेन च जन्मा दिसमुदायकारणत्वस्यैव परामर्शा त्स्वरसत श्शब्दा त्समुदायकारणत्वस्यैव ब्रह्म लक्षणत्व मवगम्यत इत्युक्तम् । एत देव ‘ यतो वे ’ त्यारभ्य ‘ उक्त ’ मि-त्यन्तेन स्फुटीकृतम् । ननु श्रुत्या समुदायस्य लक्षणत्वबोधनेपि सूत्रकारेण तस्य लक्षणत्वविवक्षण मनुपपन्नं, लघो र्जन्माद्येकैककारणत्वस्यैव सकलेतर व्यावर्तकत्वेन तस्यैव लक्षणत्वसम्भवा दिति ‘ नचे ’ त्यादिना ‘ चे ’ दित्यन्ते नाशंक्य, श्रुत्या समुदायस्य कारणताबोधना च्छ्रुत्यर्थनिर्णयाय प्रवृत्तेन सूत्र कारेणापि श्रुत्यनुरोधा त्तस्यैव लक्षणत्व मुक्त मिति समाधत्ते ‘ सत्य ’ मित्या

दिना । ननु श्रुतौ जन्मादिप्रत्येककारणत्वस्य लक्षणत्वं परित्यज्य समुदायस्य लक्षणत्वकथने किं बीजमिति शंकां 'श्रुति श्च' इत्यादिना निराकरोति । तद्विजिज्ञासस्वेत्युत्तरत्रोपासनस्य विधित्सितत्वात्, निरतिशयबृहत्त्वेनाकारेणोपासनस्य कर्तव्यत्वात, निरतिशयबृहत्त्वस्य च जन्मादिकारणत्वादिभि रेव निर्णेयत्वा, त्तत्रैकस्य परं कथने लयादिकारणत्वोपयोगि गुणविशेषाभावप्रयुक्ता बृहत्त्वशंकोदया त्तन्निराकरणेन विना निरातिशयबृहत्त्वनिश्चयायोगा च समुदायस्य लक्षणत्वं श्रुतावुक्त मिति भावः। जन्माद्येकैककारणत्वस्य लक्ष्यनिरतिशयबृहत्त्वरूपाकार विपरीताबृहत्त्वशंकानिराकरणक्षमत्वं नास्तीत्यमु मर्थ मुपपादयति 'तथाही' त्यादिना।" इति।

अयंभावः— समुदायकारणत्वमनुक्त्वा उत्पत्तिकारणं ब्रह्मेत्युक्ते श्रोतुश्शिष्यस्य 'इदमुत्पत्तिकारणंचेत् स्थितिकारणं किंचित्स्यात्, एवं लयकारणमपि, अत उत्पत्तिकारणमुपास्यं स्थितिकारणं लयकारणंवा' इति शंकयोपास्य ब्रह्मनिर्णयोनस्यात । आपातत स्सर्वोत्कृष्टतया प्रतीतेष्वग्नीन्द्रादिषु निरतिशयबृहत्त्वाश्रय व्यक्तिविशेष जिज्ञासयैवहि 'अधीहि भगवो ब्रह्मे' ति प्रश्नः कृतः, निरतिशय बृहत्त्वबोधनमुखेन व्यक्तिविशेषनिर्णयायैवच 'यतोवे' त्यादिवाक्यं प्रवृत्तं। निरतिशय बृहत्त्वबोधनं समुदायकारणत्व कथनमन्तरानुपपन्नम्, जन्मकारणत्वमात्रकथने लयादिकारणत्वोपयोगि गुणविशेषाभाव प्रयुक्ताबृहत्त्वशंका निराकरणासम्भवादिति ।

अयमपि पक्षः पाराशर्यविजये प्रतिपादितः, अयं च तत्रत्योग्रन्थः—

" 'अपरेतु अधीहि भगवो ब्रह्मे' ति मुमुक्षुभि र्जिज्ञास्यं ब्रह्म किमिति पृष्टे यद्युत्पत्तिकारणं ब्रह्मेत्युच्यते तदा शिष्यस्य स्थितौ कारणान्तरशंकया तस्याप्येतत्तुल्यताज्ञानेन

जिज्ञास्यान्तरशंकया इद मेव जिज्ञास्यमिति बुद्धि र्न स्या दिति श्रुतौ समुदायस्यैव लक्षणत्वाभिप्रायेण यच्छब्दा वृत्तावपि तच्छब्द एक एवोक्तः । तदनुसारा च्च सूत्रेपि समुदायस्यैव लक्षणत्वं विवक्षित मित्यनुगृह्णन्ति । "

— इति ।

पक्षद्वयमपीदं श्रीवेदान्ताचार्यै रधिकरणसारावळ्याम् —

" तत्तत्स्वप्रत्यनीक व्युदसननियतं भेदकंनान्यबाधि
व्याघातः कालभेदा न्नभवति जननस्थापनध्वंसनानाम् ।
प्रत्येकं लक्षणत्वं सुवचमिह बहूदाहृति र्धीमाहिम्ने
सम्भूयाप्याहुरेके फलमपिच तदा शंकितार्थ व्युदासः । "

इति संगृहीतम् ।

इदन्तु बोध्यम् — यद्यपि प्रत्येकं जगज्जन्मादिकारणत्वमेव सकलेतर व्यावर्तनक्षमं, तथापि न यथोक्त समुदायकारणत्वरूप लक्षणस्य कश्चिद्दोषः, तस्येवास्यापि लक्षणान्तरत्वे बाधकाभावात । नच प्रत्येककारणत्वं समुदायका रणत्वघटकं, येन लघो स्तद्घटकस्य तस्यैव सकलेतरव्यावर्तनक्षमत्वे शेषवैयर्थ्य शंकास्यात, समुदायकारणतात्वविषयताव्यापकत्वस्य प्रत्येककारणतात्व विष यताया मसम्भवेन तदभावात । नच लघुलक्षणं परित्यज्य गुरुभूत लक्षणप्रणयनं सूत्रकृतोसंगतमिति वाच्यं, श्रुत्यनुसारेण तल्लक्षणस्य सूत्रकृतोक्त त्वात । नच श्रुतावेव तद्विवक्षणे बीजाभावइति चोद्यं, जिज्ञास्य वस्तुविशेष निर्धारणरूपप्रयोजनस्य सत्त्वादिति ।

तदिदं ब्रह्मणोसाधारणं जगत्कारणत्वं युद्धकाण्डे विंशत्युत्तरशततमेसर्गे-

" कर्ता सर्वस्य लोकस्य श्रेष्ठो ज्ञानवतां वरः "

इति श्लोके ' कर्तासर्वस्यलोकस्येत्यनेन,

" प्रभवश्चाप्ययश्चैव मुपेन्द्रो मधुसूदनः "

इति श्लोके ' प्रभवशब्देन,

" त्वंत्रयाणांहि लोकाना मादिकर्तास्वयम्प्रभुः "

इत्यनेन, च रामात्मनावतीर्णस्य विष्णोः प्रतिपाद्यमानं तस्य परब्रह्मतां साधयति। एषु च वचनेष्वाद्य तृतीयघटककर्तृशब्दाभ्यां सामान्यतो निमित्तकारणत्वं द्वितीयवचनघटक प्रभवशब्देन प्रभवत्यस्माज्जगदिति व्युत्पत्त्या उपादानकारण त्वंच बोध्यतइति विवेकः । (स्वातन्त्र्यादिति) स्वरूपस्थिति प्रवृत्तिषु अनन्यपरतन्त्रत्वादित्यर्थः । इदं च स्वातन्त्र्यं परब्रह्मणो साधारणोधर्मः, चिदचिदीश्वररूप तत्वत्रयमध्ये ऽचेतनायाः प्रकृते स्स्वरूपस्थित्यादिषु अन्या धीनताया स्सर्वसम्मतत्वात्, " यः पृथिव्यां तिष्ठन् पृथिव्याअन्तरो यं पृथिवी नवेदयस्य पृथिवी शरीरंयःपृथिवीमन्तरो यमयति " इत्यादि श्रुतिभिः पृथिव्यादि भूतवर्गस्य परमात्म नियाम्यत्वावगमात् ; चेतनानामपि " अन्तःप्रविष्ट श्शास्ता जनानां सर्वात्मा " ' यआत्मनितिष्ठ न्नात्मनोन्तरो यमात्मानवेद यस्यात्माशरीरं य आत्मानमन्तरोयमयति ' ' आत्मात्मागुडाकेश सर्वभूताशयस्थितः । भ्राम यन् सर्वभूतानि यन्त्रारूढानि मायया ॥ ' इत्यादि श्रुति स्मृतिभिः पर मात्माधीनत्वावगमाच्च परब्रह्मभिन्नस्य स्वातन्त्र्याभावात् । परं च ब्रह्म ना न्याधीनं, ' नतस्येशेकश्चन ' ' सकारणं करणाधिपाधिपो नचास्य कश्चिज्ज- निता नचाधिपः । ' ' सर्वस्यवशी सर्वस्येशानः ' इत्यादि श्रुतिस्मृतिशतै रन न्याधीन मनन्येश्वरं चावगम्यते । तस्मात्स्वातन्त्र्यं परब्रह्मणो साधारणोधर्मएव । तच्चेदं स्वातन्त्र्यं युद्धकाण्डे विंशत्युत्तरशतमे सर्गे-

" त्रयाणांत्वं हि लोकाना मादिकर्ता स्वयस्प्रभुः । "
" त्वंत्रयाणां हि लोकाना मादिकर्ता स्वयम्प्रभुः । "

इति श्लोकयो स्स्वयम्प्रभुशब्देन विष्णौ रामरूपेणावतीर्णे प्रतिपाद्यत इति सोयं हेतु र्विष्णोः परब्रह्मतां गमयति ।

(वैश्वरूप्यादिति) विश्वं - कृत्स्नंजगत्, रूपं- शरीरं, यस्य स विश्वरूपः, तस्यभावः- वेश्वरूप्यं, कृत्स्न जगच्छरीरकत्व मित्यर्थः; तस्मात् । सकलजगच्छरीरकत्वं च परब्रह्मासाधारण मित्ययमर्थः पूर्वमेव निरूपित इति नात्र पुन र्निरूप्यते । तच्च सकलजगच्छरीरकत्वं परब्रह्मा साधारणं विंशत्युत्तरशततमे सर्गे-

"जगत्सर्वं शरीरन्ते स्थैर्यन्ते वसुधातलम् । "

इत्यत्र रामे विष्ण्ववतारे प्रतिपादितं तस्य परब्रह्मतां साधयति ।

(निखिलजगत्संहृतेरिति) सकलजगत्संहर्तृत्वादित्यर्थः । सकलजगत्संहर्तृत्वंच परब्रह्मासाधारणं, " यतोवा इमानि " इत्यादि श्रुतौ ' यत्प्रयन्त्य भिसंविशन्ती ' ति ब्रह्मणो लयकारणत्वप्रतिपादनात् ।

अत एवात्र धिकरणे " यस्य ब्रह्मच क्षत्रंच उभे भवत ओदनः । मृत्यु र्यस्योपसेचनं कइत्था वेद यत्रसः ॥ " इति कठवल्ली श्रुतौ ओदनोपसेचन संसूचितोक्ता जीव उतपरमात्मेति संशये भोक्तृत्वस्य कर्मनिमित्तत्वाज्जीवएवेति पूर्वपक्षयित्वा, कृत्स्न चराचरात्तृत्वस्य ब्रह्मभिन्नेऽसम्भावितत्वा द्ब्रह्मणि च संहर्तृत्वरूपात्तृत्वस्य संभवा दुक्त श्रुतिप्रतिपाद्योक्ता ब्रह्मैवेति सकलजगत्संहर्तृत्वस्य ब्रह्मासाधारणत्वाश्रयणेन सिद्धान्तितम् । तच्चेदं सकलजगत्संहर्तृत्वं तस्मिन्नेव सर्गे-

" प्रभव श्चाप्यय श्च त्व मुपेन्द्रो मधुसूदनः "

इत्यत्र,

" अन्तेचादौच लोकानां दृश्यसेत्वं परन्तप । "

इत्यत्र च रामरूपस्य विष्णोः प्रतिपाद्यमानं तस्य परब्रह्मतां गमयति । अप्येत्यस्मिन्नित्यप्यय इति व्युत्पत्त्याप्ययशब्दस्य सकलजगल्लयाधिष्ठानता बोधकत्वेन सकलजगत्संहर्तृत्व लाभात्, ' अन्तेचादौच लोकानां दृश्यस ' इत्यनेन सकलजगन्नाशानन्तर कालवर्तित्वबोधनेन सृष्टि प्राक्कालवर्तित्वस्य उत्पत्तिकारणत्व प्रयोजकत्ववत् अन्तकालवर्तित्वस्य संहारकारणत्व प्रयोजकतालाभेन संहर्तृत्व लाभाच्च वचनद्वयमिदं विष्णोस्संहर्तृता बोध क मवसेयम् ।

(व्यापकत्वादिति) सकलजगद्व्याप्तेरित्यर्थः । व्याप्तिश्चात्र बहिरन्त र्देशावच्छेदेन विवक्षिता । सर्वदेशावच्छेदेन सकलजगद्व्यापकत्वं पर्यवसन्नम् । इदं च परब्रह्मासाधारणं, " नित्यंविभुंसर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः " " येनावृतंखंचदिवं महीं च " ' वृक्षइव स्तब्धोदि वितिष्ठत्येकस्तेनेदं पूर्णपुरुषेणसर्वं ' " अन्तर्बहिश्च तत्सर्वं व्याप्यनारायणः स्थितः " ' अन्तःप्रविष्टशास्ताजनानां सर्वात्मा ' इत्यादि परश्शत श्रुतिस्मृति भिर्ब्रह्मण स्त्वेतर सकलजगद्व्यापकत्व प्रतिपादनात् । तदिदं व्यापकत्वं तत्रैव सर्गे –

" दृश्यसे सर्वभूतेषु ब्राह्मणेषु च गोषुच ।
दिक्षु सर्वासु गगने पर्वतेषु वनेषु च ॥ "

इत्यत्र रामस्य विष्ण्ववतारस्य प्रतिपाद्यमान मवगमयति तस्य परब्रह्मताम् ।

(सर्वज्ञत्वादिति) इदंच ब्रह्मणोसाधारणोधर्मः, "यस्सर्वज्ञस्सर्ववित्"

इति मुण्डकोपनिषदि ब्रह्मणस्सर्वज्ञत्वकथनात् । तच्च तत्रैव सर्गे–

"कर्तासर्वस्य लोकस्य श्रेष्ठो ज्ञानवतांवरः ।"

इति विष्णोः प्रतिपाद्यमानं तस्य परब्रह्मताबोधकम् ।

(अनन्तेक्षणचरणशिरोवत्त्वतइति) अनन्तानि, ईक्षण चरणशिरांसि यस्य, तत्त्वेनेत्यर्थः । अनन्तेक्षणत्वात् अनन्तचरणत्वात, अनन्तशिरस्त्वाच्चेतियावत । इदं चानन्तेक्षणत्वादिकं ब्रह्मासाधारणधर्मः,

"विश्वतश्चक्षु रुतविश्वतोमुखो विश्वतोहस्त उतविश्वतस्पात।"
" सहस्रशीर्षापुरुष स्सहस्राक्षस्सहस्रपात् "
" सर्वतः पाणिपादन्त त्सर्वतोक्षिशिरोमुखम् "

इत्यादिश्रुतिस्मृतिभि र्ब्रह्मण स्तथात्व प्रतिपादनात । तानिचानन्तेक्षणत्वादीनि—

" सहस्रचरणश्श्रीमान् शतशीर्षस्सहस्रदृक् . "

इति विंशत्युत्तर शततमे सर्गे विष्णोः प्रतिपाद्यमानानि तस्यसाधयंति परब्रह्मतां । अत्र शतशब्दः पर्वोत्तरानुगुण्येन सहस्रपर्यायोनन्तमेव प्रतिपादयति ।

(सर्वयज्ञाराध्यत्वादिति) सर्वयज्ञसमाराध्यत्वंच ब्रह्मणोसाधारणोधर्मः, "तस्माद्यज्ञात्सर्वहुतः ।" इति ब्रह्मण स्सर्वयज्ञसमाराध्यत्व श्रवणात् । सर्वहूयतेस्माइति सर्वहुच्छब्दस्य सर्वयज्ञसमाराध्यता प्रतिपादकत्वात् ।

" अहंहिसर्वयज्ञानां भोक्ताच प्रभुरेवच "

इति सर्वयज्ञफलभोक्तृत्व स्मरणाच्च । तच्चात्र —

" त्वंयज्ञस्त्वं वषट्कार स्त्वमोंकारः परंतपः "

इति श्लोके यज्ञशब्देन इज्यत इति यज्ञइतिव्युत्पत्त्या विष्णौ प्रतिपाद्यतइति तदपि तस्यपरमात्मतां साधयति ।

(पुण्डरीकप्रभनयनतयेति) पुण्डरीकाक्षत्वादित्यर्थः । पुण्डरीकाक्षत्वस्यपरब्रह्मधर्मत्वं पूर्वमेव बालकाण्डगतहेतुव्याख्यानावसरे विस्तरेण निरूपितमिति नात्र पुनस्तन्यते । तच्चयुद्धकाण्डे द्वाविंशत्युत्तर शततमे सर्गे

" पुष्कराक्षमहाबाहो महावक्षः परन्तप ।
दिष्ट्याकृतमिदं कर्म त्वयाशस्त्रभृतांवर ॥ "

इति रुद्रवचने पुष्कराक्षशब्देन रामात्मनोविष्णोः प्रतिपादितं तस्यपरब्रह्मतां गमयति ।

(वेदसंस्कारवत्त्वादिति) वेदाभिन्नसंस्कारवत्त्वादित्यर्थः । वेदानां पर ब्रह्मसंस्काररूपत्वं च बृहदारण्यके —

" सयथार्द्रैधाग्नेरभ्याहतस्य पृथग्धूमा विनिश्चरन्त्येवं वा अरेस्य महतोभूतस्य निश्वसितमेवैतद्य दृग्वेदो यजुर्वेद स्सा मवेदोधर्वांगिरस इतिहासः पुराणं विद्या उपनि षदः श्लोका स्सूत्राण्यनु व्याख्यानानि व्याख्यानान्यस्यैवै तानि सर्वाणि निश्वसितानि । "

इति मन्त्रे ऋग्यजुरादि भेदभिन्नानां वेदानां ब्रह्मणो निश्वसित तुल्यत्व प्रति पादनेन लभ्यते । तच्चेदं युद्धकाण्डे विंशत्युत्तरशततमे सर्गे —

" संस्कारास्ते भवन्वेदा नतदस्ति त्वयाविना । "

इत्यत्र विष्णोः प्रतिपाद्यमानं विष्णोः परब्रह्मतासाधकम् ।

सर्वेषांधारकत्वात्सलिलशयनतस्सत्यतानामयत्वा
व्यक्तत्वैःपूरुषत्वाच्छ्रुतिविदिततमःपारवर्तित्वतश्च ।
ब्रह्मेत्यम्भोजयोनिप्रमथपतिमुखैर्निर्जरै स्स्पष्टमुक्ते
वाल्मीकिर्ब्रह्मवेदोदितपरममहत्त्वाश्रयत्वात्परंतत् ॥१६॥

(सर्वेषांधारकत्वादिति) सर्वधारकत्वं च स्वशासनाधीन सर्वजगद्धारणत्वम् । तच्च परब्रह्मणो साधारणोधर्मः,

" एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठतः । एतस्य वा अक्षरस्य प्रशासने गार्गिनिमेषा मुहूर्ता अहोरात्राण्यर्धमासामासा ऋतवस्संवत्सराइति विधृता स्थिष्ठन्ति । "

इत्यादिना बृहदारण्यक पंचमाध्यायाष्टमब्राह्मण नवममन्त्रेण सूर्यादीनां पर ब्रह्मशासनाधीन धारणत्व प्रतिपादनात; तथा तस्मिन्नेव ब्राह्मणे —

" सहोवाचयदूर्ध्वं गार्गिदिवोयदर्वा क्पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतंच भवच्चभविष्यच्चेत्याचक्षत आकाशएव तदोतंच प्रोतंचेति कस्मिन्नुखल्वाकाश ओतश्च प्रोतश्चेति । सहोवाचैतद्वैतदक्षरं गार्गिब्राह्मणा अभिवदन्ति"

इत्यादिना त्रैकाल्यवर्तिसर्ववस्त्वाधारभूताकाश शब्दवाच्याव्याकृतस्या प्याधारत्वेना क्षर शब्दवाच्यस्य ब्रह्मणः प्रतिपादनेन सकलवस्त्वाधारत्वस्य ब्रह्मणिलाभाच्च ।

अतएवाक्षराधिकरणे "सहोवाचैतद्वैतदक्षरं गार्गिब्राह्मणा अभिवदन्ति" इत्यत्रा क्षरशब्देननिर्दिष्टं प्रधानं जीवोब्रह्मवेतिसंशय्य प्रधानमिति पूर्वपक्षयित्वा, अव्याकृतपर्यन्त कृत्स्नाधारत्वस्य प्रधानेऽसंभवाद्ब्रह्मैवेति "अक्षरमम्बरान्तधृतेः" इतिसूत्रेण सिद्धान्तयित्वा, अम्बरान्तशब्दवाच्या व्याकृत भूतसूक्ष्मपर्यन्त सकलवस्तुजातधारणमपि ब्रह्मण श्शासनाधीन मेवेत्ययमंशः " साचप्रशासनादि " त्युत्तरसूत्रेणोक्तः ।

तस्मात्प्रशासनाधीन सर्ववस्तुधारणकर्तृत्वं ब्रह्मणोसाधारणधर्म एवेति सिद्धम् । तदिदं श्रीरामायणे युद्धकाण्डे चतुर्दशेसर्गे —

" तमसः परमोधाता शंकचक्र गदाधरः । "

इत्यत्र धातृशब्देन विष्णोः प्रतिपाद्यते । तथाविंशत्युत्तर शततमे सर्गे —

" त्वंधारयसिभूतानि वसुधांचसपर्वताम् ।
अन्तेपृथिव्यास्सलिले दृश्यसेत्वं महोरगः ॥
त्रीन्लोकान् धारयन्नाम देव गंधर्वदानवान् ॥ "

इत्यत्रच विष्णोः स्फुटं प्रतिपाद्यते । ब्रह्मधर्मभूतंच तद्विष्णौप्रतिपाद्यमानं तस्य परब्रह्मतामवगमयत्येव ।

(सलिलशयनत इति) समुद्रशायित्वादित्यर्थः । समुद्रशायित्वं च ब्रह्मधर्मः । तथा च तैत्तिरीयोपनिषदि षष्ठप्रश्ने- प्रथमे नुवाके

" अम्भस्यपारे भुवनस्यमध्ये नाकस्यपृष्ठे महतोमहीयान् ।
शुक्रेणज्योतींषि समनुप्रविष्टः प्रजापतिश्चरतिगर्भे अन्तः ॥ "

इति प्रथमोमन्त्रः । " ' प्रजापतिः '- प्रजानांपतिः परंब्रह्म । ' शुक्रेण ' स्वतेजसा । ' ज्योतींषि '- आदित्यादिज्योतींषि, ' समनुप्रविष्टः '- सम्यगनुप्रविष्टः, स्वतेजः प्रवेशद्वारा तेषामप्यनुग्राहक इत्यर्थः । ' अपारे अम्भसि '- समुद्रे, ' भुवनस्यमध्ये '- अन्तरिक्षे , ' नाकस्यपृष्ठे '- परमव्योमशब्द वाच्ये स्थानविशेषेच । सन्निहित इत्यध्याहार्यम् । ' महतो महीयान् ' - परममहत्परिमाणवान् । ' गर्भे अन्तः '- अन्तर्गर्भे, सर्वेषां हृदयमध्य इति यावत् ! ' चरति '- परिवर्तते । " इत्यस्या श्रुतेरर्थो बोद्धव्यः । अत्र च प्रजापतिशब्दवाच्यस्य ब्रह्मणः समुद्रवर्तित्वं स्पष्टंप्रतिपादितम् । नचायं प्रजापतिशब्दः प्रसिद्धचतुर्मुखपरइति शंकनीयं, परममहत्परिमाणाद्य सम्भवात् ।

एवं तस्मिन्नेवानुवाके —

" येनावृतंखंचदिवं महींचयेनादित्यस्तपति तेजसाभ्राजसाच ।
यमन्त स्समुद्रे कवयो वयन्ति तदक्षरेपरमेप्रजाः ॥ "

इति तृतीयमन्त्रेपि परब्रह्मणस्समुद्रवर्तित्वं प्रतिपादितम् । एवमन्यत्रापि द्रष्टव्यम् ।

तच्चेदं समुद्रशायित्वं युद्धकाण्डे विंशत्युत्तरशततमे सर्गे —

" अन्तेपृथिव्यास्सलिले दृश्यसेत्वंमहोरगः । "

इत्यत्र विष्णोः प्रतिपाद्यमानं तस्य परमात्मतासाधकंभवति ।

(सत्यतानामयत्वा व्यक्तत्वैरिति) सत्यत्वं निरूपाधिकसत्तायोगित्वं । तच्च " सत्यंज्ञानमनन्तंब्रह्मे " त्यत्र श्रुतौ ब्रह्मधर्मतया वगतम् । अनामयत्वं शारीरमानसादि सर्वविधामयरहितत्वं, तदपि " अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोपिपासः " इत्यादिभि श्श्रुतिभि र्ब्रह्मधर्मतया प्रतिपादितम् । अव्यक्तत्वं च भक्तिशून्यै श्चक्षुरादिभिश्च दुर्ज्ञेयत्वम् । तदपि च ' यत्तदद्रेश्यमग्राह्यं ' ' अदृष्टोद्रष्टा ' ' नचक्षुषागृह्यतेनापि वाचा ' ' नाहं वेदैर्नतपसा नदानेन नचेज्यया । शक्य एवंविधो द्रष्टुं दृष्टवानसिमां यथा ॥ ' इत्यादि श्रुतिस्मृतिभि र्ब्रह्मधर्मतया ज्ञातम् । एतानि च सत्यत्वानामयत्वा व्यक्तत्वानि युद्धकाण्डे —

" अक्षरंब्रह्मसत्यंच मध्येचान्तेच राघव । "

इतिविंशत्युत्तरशततमसर्ग गत चतुर्मुखवचनस्थ सत्यशब्देन,

" तंमन्ये राघवंवीरं नारायणमनामयं । "

इति द्विसप्ततितम सर्गगत रावणवचनस्थानामय शब्देन,

" एतत्तदुक्त मव्यक्त मक्षरं ब्रह्मनिर्मितम् । "

इति द्वाविंशत्युत्तर शततमसर्गस्थ दशरथवाक्यगत श्रीरामविषयकाव्यक्तशब्देनच विष्णोः प्रतिपाद्यमानानि तत्य परब्रह्मता साधकानि भवन्तीति ज्ञेयम् ।

(पूरुषत्वादिति) पुरुषत्वादित्यर्थः । पुरिशेतइति पुरुष इति व्युत्पत्त्या सकलचेतन हृदयगुहावर्तित्वादिति पर्यवसितोर्थः । इदंच पुरुषत्वं परब्रह्मणो साधारणोधर्मः, " परात्परं पुरिशयं पुरुषमीक्षत इतिश्रुतेः; तैत्तिरीयोपनिषदि षष्ठप्रश्ने द्वादशानुवाके —

" पद्मकोशप्रतीकाशं हृदयंचाप्यधोमुखम् ।
अथोनिष्ठ्याविवस्त्यांतु नाभ्यामुपरितिष्ठति ।
हृदयन्ताद्विजानीयाद्विश्वस्यायतनंमहत् ।
सन्ततैस्सिराभिस्तुलंबत्या कोशसन्निभम् ॥
तस्यान्ते सुषिरँसूक्ष्मं तस्मिन्सर्वंप्रतिष्ठितम् ।
तस्यमध्ये महानग्नि विश्वार्चि विश्वतोमुखः ।
सोग्रभुग्विभजन् तिष्ठन्नाहारमजरः कविः ।
सन्तापयति स्वंदेहमापादतलमस्तकम् ।
तस्यमध्येवह्निशिखा अणीयोर्ध्वाव्यवस्थितः ।
नीलतोयदमध्यस्थाविद्युल्लेखेवभास्वरा ।
नीवारशूकवत्तन्वी पीताभास्यात्तनूपमा ।
तस्याश्शिखायामध्ये परमात्माव्यवस्थितः । " इति

सर्वेषां शरीरग्रीवाबंधनादधोनाभे रुपरि पद्मकोशसदृशस्य हृदयकोशस्याधोमुखतयावस्थानं, हृदयमध्ये जाठराग्नेरवस्थानं, तस्यापि मध्येजीवात्मनोवस्थानं प्रतिपाद्य, तादृशस्यात्मनो वह्निशिखावत्प्रकाशमानस्य मध्येपरमात्मनोवस्थानस्य प्रतिपादनेन हृदयगुहावर्तित्वलाभात् ;"अन्तश्शरीरे निहितोगुहाया मजएकोनित्यः" इतिश्रुत्या,

" अहमात्मागुडाकेश सर्वभूताशयस्थितः । "
" ईश्वरस्सर्वभूतानां हृद्देशेर्जुनतिष्ठति "

इत्यादिस्मृतिभिश्च ब्रह्मणस्तथात्वप्रतिपादनाच्च । तच्च युद्धकाण्डे विंशत्युत्तरशततमे सर्गे —

" शार्ङ्गधन्वाहृषीकेशः पुरुषः पुरुषोत्तमः "

इति विष्णोः प्रतिपाद्यमानं तस्य परब्रह्मतां गमयति ।

(श्रुतिविदिततमः पारवर्तित्व तथेति) श्रुतिविदितात् - श्रुति प्रसिद्धात्, तमसः - तमश्शब्दवाच्यायाः प्रकृतेः, पारवर्तित्वतः - पारवर्ति

त्वादित्यर्थः । प्रकृतिमण्डलात्परतो वर्तमानत्वादिति यावत् । इदं च पर ब्रह्मणोधर्मः, " आदित्यवर्णं तमसस्तुपारे " ' आदित्यवर्णं तमसः परस्तात् ' " क्षयन्तमस्य रजस्यः पराके " इत्यादिभि र्ब्रह्मणः प्रकृतिमण्डलात्परतो वर्तमानत्व प्रतिपादनात् । अत्र रजस्तमश्शब्दौ त्रिगुणात्मिकायाः प्रकृतेर्वाचकौ, केवलस्य तमसोरजसोवा गुणस्यावस्थित्यसम्भवात् । तच्चेदं तमः पारवर्तित्वं युद्धकाण्डे चतुर्दशोत्तरशततमे सर्गे ।

" तमसः परमोधाता शंखचक्र गदाधरः "

इत्यत्र विष्णोः प्रतिपाद्यमानं तस्य परमात्मतां साधयति, तद्धर्मस्य तदन्यत्रा सम्भवात् ।

इत्थं ब्रह्मधर्माणां विष्णौ प्रतिपादनमुखेन तस्य परब्रह्मतां साधयन् वाल्मीकिः विष्णौ चतुर्मुखादीनां परब्रह्मतोक्ति निदर्शनेनापि तत्साधयतीत्याह (ब्रह्मेतीति) " अम्भोजयोनि प्रमथपति मुखैः " - चतुर्मुख शिव प्रभृतिभिः । " निर्जरैः "- देवैः । " ब्रह्मेति स्पष्टमुक्तेः " - कण्ठत एव ब्रह्मेत्युक्तत्वादित्यर्थः । तथा च श्रीरामायणे युद्धकाण्डे द्वाविंशत्युत्तरशततमे सर्गे लक्ष्मणं प्रति दशरथवाक्यम् —

" एते सेन्द्रास्त्रयोलोका स्सिद्धाश्च परमर्षयः ।
अभिगम्यमहात्मान मर्चन्ति पुरुषोत्तमम् ॥
एत त्तदुक्त मव्यक्त मक्षरं ब्रह्म निर्मितम् ।
वेदानां हृदयंसौम्य गुह्यं रामः परं तपः ॥ " – इति ।

वेदानां हृदयं · वेदतात्पर्यभूतं, गुह्यं· वेदान्तगूढं, अव्यक्तं- भक्तिशून्यैर्दुर्ज्ञेयं, अक्षरं- विकारशून्यं च, तदेत् - प्रसिद्धं, ब्रह्म, परन्तपो रामो निर्मितं - रामरूपेणावतीर्णं, इति, उक्तं, ब्रह्मादिभिरेतैर्मह्यमिति शेषः । श्रुतिशिरः प्रतिपाद्यं वेदतात्पर्यभूतं दुर्ज्ञेयं तत्परंब्रह्मैव रामरूपेणावतीर्णमिति ब्रह्मादयो मह्यमवद न्नित्यर्थः । अत्र च ब्रह्मादीनां रामात्मनावतीर्णस्य विष्णोः

परब्रह्मतोक्तिस्सुस्पष्टा । एवं विंशत्युत्तरशततमेसर्गे सर्वदेवपुरस्कृतस्य चतुर्मुखस्य श्रीरामं प्रतिपूर्ववृत्तान्त कथनसमये –

" भवान्नारायणोदेव श्रीमांश्चक्रायुधोविभुः ।
एकशृंगो वराहस्त्वं भूतभव्य सपत्नजित् ॥
अक्षरंब्रह्मसत्यंच मध्येचान्तेच राघव । "

इति साक्षात्परब्रह्मत्वोक्ति रप्यत्रविवक्षिता । अत्रच न चतुर्मुखस्वाभिप्राय मात्रं कथयति, किन्तुसर्वेषां शचीपति शिवापति प्रभृतीनां देवानामपि । अतएव–

" ततोवैश्रवणोराजा यमश्चामित्र कर्शनः ।
सहस्राक्षो महेन्द्रश्च वरुणश्च परंतपः ।
षडर्धनयनः श्रीमान् महादेवो वृषध्वजः ।
कर्तासर्वस्य लोकस्य ब्रह्माब्रह्मविदांवरः ॥
एतेसर्वेसमागम्य विमानैस्सूर्य सन्निभैः ।
आगम्य नगरीं लंकामभिजग्मुश्च राघवम् ॥
अब्रुवन्त्रिदशश्रेष्ठाः प्रांजलिं राघवं स्थितम् ॥ "

इति इन्द्र शिव यम वरुण चतुर्मुखप्रभृतीनां लंकामागत्य रामाभिगमनं रामंप्रति " कर्तासर्वस्ये " त्यादिकथनं च पूर्वोक्तं संगच्छते । संगच्छतेचातएव

" इत्युक्तो लोकपालैस्तैस्स्वामीलोकस्य राघवः ।
अब्रवीत्त्रिदशश्रेष्ठा न्रामोधर्मभृतांवरः ॥ "

इत्यादिना श्रीरामचंद्रेण सर्वान्देवान्प्रति " आत्मान " मित्यादि कथिते चतुर्मुखस्यै कस्यैव प्रत्युत्तरकथन प्रवृत्तिश्च प्रतिपाद्यमाना । अन्यथासर्वैरेव प्रत्युत्तरे वक्तव्ये चतुर्मुखेन परंतत्कथनस्या संगतत्वापत्तेः । तस्माच्छिवशचीपत्यादि प्रेरितेन चतुर्मुखेनोक्त मिदं वाक्यमपि सर्वेषां वाक्यमेवेति सर्वेरेवरामस्य ब्रह्मत्वमुक्तं भवति ।

(आगमान्तोदित परममहत्त्वा श्रयत्वाच्चेति) आगमान्तो दितस्य — ब्रह्मधर्मतया वेदान्त प्रतिपादितस्य, परममहत्त्वस्य, आश्रयत्वादित्यर्थः । परममहत्परिमाण वत्त्वादिति यावत् । परममहत्परिमाणवत्त्वंच परब्रह्मणोधर्मः, " परात्परं य न्महतो महान्तं " " अणोरणीया न्महतोमहीयान् " इयादि श्रुतिस्मृतिभि स्तथात्वावगमात् ; " बृहतिबृंहयति तस्मादुच्यते परंब्रह्मे " ति ब्रह्मशब्दनिर्वचनेन, " बृहत्त्वाद्बृंहणत्वाच्च तद्ब्रह्मेत्यभिधीयते । " इतिस्मृत्याच तथाप्रतिपादनाच्च ।

तच्चेदं परममहत्परिमाणवत्त्वं युद्धकाण्डे चतुर्दशोत्तरशततमसर्गे-
" अनादिमध्यनिधनो महतः परमोमहान् । "
इति विष्णोः प्रतिपाद्यमानं तस्य परब्रह्मता मवगमयतीति सर्वं सुस्थम् ।

इत्थं काण्डषट्क गतान् विष्णोः परत्वगमकान् हेतून् संगृह्याथ उत्तर काण्डगतान् संगृह्णाति " माल्यादीना " मित्यादि श्लोकद्वयेन ।

माल्यादीनां हराब्जासनमुखविबुधावध्यरात्रिंचराणां
देवारीणां वधादम्बुजभवजनकत्वा त्तदापद्विनाशात् ।
रुद्रेणस्पष्टमेव प्रभुरितिकथना द्ब्रह्मणोपास्यतोक्ते
र्देवानामीश्वरत्वा त्सकलसुरगणै रर्चितत्वात्स्तुतत्वात् ॥१७॥

(माल्यादीनामिति) " माल्यादीनां "- मालिप्रभृतीनां, " देवारीणां "- देवशत्रूणां, " हराब्जासनमुखविबुधावध्य रात्रिंचराणां "- हराब्जासनमुखानां शिव चतुर्मुखप्रभृतीनां, विबुधानां - देवानां, अवध्याः - हन्तुमशक्याः, ये रात्रिंचराः - राक्षसाः, तेषां; " वधात् " - वधकर्तृत्वादित्यर्थः ।

अयंच हेतु शिवचतुर्मुखादिभ्यः परत्वभ्रमविषयेभ्यो विष्णोः परत्व साधकः, तदवध्य वधकर्तृत्वस्य तस्मात्परत्व साधकताया लौकिकन्यायेनैवसिद्ध

त्वात् । शिवचतुर्मुखादिभ्यः परत्वं साधयंश्चाय मसंकोचात्सर्वस्मात्परत्व साधको भवति ।

हेतुश्चाय मुत्तरकाण्डे सप्तमे सर्गे-

" तत्सूर्यमण्डलाभासं स्वभासाभासयन्नभः ।
कालचक्रनिभंचक्रं माल्येशीर्षमपातयत ॥ "

इत्यादिना माल्यादि वधप्रतिपादनपरेण ग्रन्थेनप्रोक्तः । माल्यादीनां शिवचतुर्मुखाद्यवध्यत्वंच —

" अहंतान्नहनिष्यामि मयाऽवध्याहितेसुराः ।
किन्तुमन्त्रं प्रदास्यामि योवैता न्निहनिष्यति ॥ "

इति माल्यादिवधप्रार्थनायागतान् देवान्प्रति शिववचनेन षष्ठसर्गगतेन,

" इत्येवं त्रिदशैरुक्तो निशम्यान्धकसूदनः ।
शिरःकरंच धुन्वान इदंवचनमब्रवीत् ॥
अवध्याममते देवा! सुकेशतनयारणे ।
मन्त्रन्तुवः प्रदास्यामि यस्तान्वैनिहनिष्यति ॥ "

इति शिवदेवसमागमकालिक वृत्तकथनावसरे शिववचनमनुवदतो माल्यवतस्तत्सर्गगतेनैव वचनेन, च सुव्यक्तं । स्थलद्वयेपि शिवेनैव सुकेशतनयानां माल्यादीनां स्वावध्यत्वकथनात् ।

" येत्वयानिहतास्तेतु पौलस्त्या नामराक्षसाः ।
सुमालीमाल्यवान्माली तेभ्यस्तेबलवत्तराः ॥
नचान्योराक्षसान् हन्ता सुरारीन् देवकण्टकान् ।
ऋतेनारायणं देवं शंखचक्र गदाधरम् ॥ "

इत्यष्टमसर्ग गतागस्त्यवचनेच सुमाल्यादीनां नारायणान्यावध्यत्वं सुस्पष्टमुक्तम् । तेन चतुर्मुखशिवाद्य शक्यवधत्वं माल्यादीनां लब्धम् । इत्थं

च शिवचतुर्मुखाद्यवध्य मात्याधिवधकर्तृत्वं विष्णो स्तेभ्यः परत्वं निराबाध मेव साधयतीति सिद्धम ।

(अम्बुजभवजनकत्वादिति) अम्बुजभवस्य- चतुर्मुखस्य प्रजापतेः, जनकत्वात् - उत्पादकत्वादित्यर्थः । चतुर्मुखजनकत्वं च ब्रह्मणोधर्मः,

" योब्रह्माणं विदधातिपूर्वं योवैवेदांश्च प्रहिणोति तस्मै ।
तंहदेवमात्मबुद्धिप्रसादं मुमुक्षुर्वै शरणमहंप्रपद्ये ॥ "

इति श्वेताश्वतरोपनिषदि षष्ठाध्याये श्रुतेः,

" अजस्यनाभावध्येकमर्पितम् , यस्मिन्निदं विश्वम्भुवन मधि
श्रितं. विश्वकर्माह्य जनिष्टदेवः ॥ "

इति श्रुतेश्च । तच्चात्र चतुरुत्तरशततमे सर्गे —

" पितामहश्चभगवानाह लोकपतिः प्रभुः ।
समयस्तेकृतस्सौम्य स्वान् लोकान् परिरक्षितुं ॥
संक्षिप्यहिपुरालोकान् माययास्वयमेवहि ।
महार्णवेशयानोप्सु मांत्वं पूर्वमजीजनः ॥ "

इति,

" पद्मादिव्येर्कसंकाशे नाभ्यामुत्पाद्यमामपि ॥ "

इति च पितामह वचनानुवादरूपेण रामं प्रति कालवाक्येन विष्णोः प्रति पाद्यमानं तस्य परब्रह्मतामवगमयति ।

(तदापद्विनाशादिति) तस्य- चतुर्मुखस्य, या आपत - मधुकैटभ कृत वेदापहारजन्या, तस्याः, विनाशात् , तद्विनाशकरणादित्यर्थः । तदीयापन्नाशकस्य तस्मात्परत्वावश्यकतया, चतुर्मुखापद्विनाशकत्वं चतुर्मुखा त्परत्वं साधयत, चतुर्मुखस्य च सकलदेवोत्तमत्वेन ततः परत्वसाधनमुखेन सर्वस्मात्परत्व मेव साधयति ।

चतुर्मुखाप द्विनाशकत्वं चात्रचतुरुत्तरशततमे सर्गे –

" माययाजनयित्वात्वं द्वौचसत्त्वौ महाबलौ ।
मधुंच कैटभंचैवयया रस्थिचयैर्वृता ।
इयंपर्वतसंबाधा मेदिनीचाभवन्मही ॥ "

इति मधुकैटभ प्रस्तावेन तदीयास्थिचयप्रस्तावेनच स्मारितम् । एकोन सप्ततितमे सर्गेच –

" एषपूर्वस्य देवस्य लोककर्तुस्सनातनः ।
शरस्तेजोमयो वत्सयेन वैभयमागतम् ॥
सृष्टोमहात्मनातेन वधार्थे दैत्ययोस्तयोः ॥ "

इति विष्णोर्मधुकैटभवधार्थं तेजोमयस्य कस्यचिच्छरस्य सर्जनकथनाच्च सूचितं । (रुद्रेणस्पष्टमेव प्रभुरितिकथनादिति) अत्रायंभावः – नहिस्वस्मान्निकृष्टं समंवा लोकेकश्चिप्रभुरिति निर्दिशति, किन्तुस्वस्मा दुत्कृष्टमेव, इत्थंचरुद्रेण प्रभुरिति कथितत्वा द्विष्णोरुद्रापेक्षयो त्कृष्टत्वमावश्यकमित्यनेन हेतुना विष्णो रुद्रादु त्कृष्टत्वेसिद्धे, पूर्वोक्तैश्च हेतुभि श्चतुर्मुखादुत्कृष्टत्वेचसिद्धे सम्भाव्यमानप रत्वेषु ब्रह्मरुद्रविष्णुषु त्रिषु परिशेषा द्विष्णो स्सर्वस्मात्परत्वंसिध्यतीति । विष्णु विषये प्रभुशब्दप्रयोगश्च षष्ठेसर्गे –

" एतमेव समुद्योगं पुरस्कृत्य महर्षयः ।
गच्छध्वं शरणं विष्णुं हनिष्यति सतान्प्रभुः ॥ "

इति देवान्प्रति रुद्रवाक्ये दृश्यते ।

(ब्रह्मणोपास्यतोक्तेरिति) " ब्रह्मणा " चतुर्मुखेन, " उपास्य तोक्तेः "–विष्णोः स्वोपास्यता कथनादित्यर्थः । अयमपि हेतुः पूर्वहेतुवद्विष्णो श्चतुर्मुखापेक्षया परत्वं बोधयन् , सर्वस्मा त्परत्वं तस्य साधयति ।

" पद्मादिव्येर्कसंकाशे नाभ्यामुत्पाद्यमामपि ।
प्राजापत्यं त्वयाकर्म मयिसर्वंनिवेशितम् ॥
सोहं सन्न्यस्तभारोहि त्वामुपासे जगत्पतिम् । "

इति चतुरुत्तरशततमेसर्गे कालेनानूद्यमाने चतुर्मुखवाक्ये ब्रह्मणा रामात्मनो विष्णो रुपास्यत्वं कथितमवगन्तव्यम ।

(देवानामीश्वरत्वा त्सकलसुरगणै रर्चितत्वात्स्तुतत्वादिति) इदंच हेतुत्रयं बालकाण्डोक्तहेतुत्रयवदेव विष्णोः परत्वसाधकमिति तद्विचारस्य पूर्वमेव कृततया नात्र पुनः प्रतन्यते । हेतुत्रयंचेदं —

" पितुस्तु ममजामाता विष्णुः किलसुरेश्वरः ।
अभिप्रेतस्त्रिलोकेश स्तस्मान्नान्यस्य मेपिता ॥ "

इति सप्तदशसर्गगत वेदवतीवाक्यगत सुरेश्वरशब्देन,

" एवं सन्दिश्य तां वाणीं देवानाममृतोपमां ।
जगामविष्णुर्देवेशः स्तूयमानस्त्रिविष्टपम् ॥ "

इति पंचाशीतितमसर्गगत वचनघटक देवेशशब्देन,

" हतारयःप्रणष्टेन्द्रा देवास्साग्निपुरोगमाः ।
विष्णुं त्रिभुवनेशानं मुहुर्मुहुरपूजयन् ॥ "

— इति,

" जगामविष्णु र्देवेश स्स्तूयमानस्त्रिविष्टपम् ॥ "

इतिच पंचाशीतितमसर्गगत श्लोकाभ्यां,

" तत्रां विष्णुमयं देवं पूजयन्तिस्मदेवताः । "

इति दशोत्तरशततमसर्गगत श्लोकेनच यथा यथं प्रतिपादितं वेदितव्यम् ।

सर्वेभ्यः पूर्वजत्वा दथ सकल जगत्कारणाकाशभावा
त्सेन्द्रै र्देवै रशेषैः सततमपि समाराधनीयत्वतश्च ।
अन्त्येकाण्डेमुनीन्द्रः कविकुलतिलकः प्राहवल्मीकजन्मा
रामाकारं मुरारिं स्फुटमिहपरमं ब्रह्म वेदान्तवेद्यम् ॥१८॥

(सर्वेभ्यः पूर्वजत्वादिति) " सर्वेभ्यः " - दैवमनुष्यादिभ्यः, " पूर्वजत्वात् " - पूर्वमेव देवादिसृष्ट्यर्थं माविर्भूतत्वादित्यर्थः ।

" एष पूर्वस्य देवस्य लोककर्तुस्सनातनः । "
इति एकोनसप्ततितमे सर्गे,

" त्वं गतिः परमेशान पूर्वजो जगतः पिता । "
इति पंचाशीतितमेसर्गे चायं हेतुरुक्तः ।

(सकलजगत्कारणाकाशभावादिति) सकलजगत्कारणत्वेन श्रुतिप्रसिद्धाकाशरूपत्वादित्यर्थः ।

" सर्वाणिहवा इमानि भूता न्याकाशादेव समुत्पद्यन्त "

इति सकलजगत्कारणत्व माकाशस्य श्रुतं । तच्चाकाशत्वं परब्रह्मणएवेति " आकाशस्तल्लिंगात् " इति बादरायणेन व्यवस्थापितं । आकाशत्वं चात्रविष्णोः

" यामिच्छसिमहाबाहो तान्तनुं प्रविशस्वकां ।
वैष्णवींताम्महातेजो यद्वाकाशं सनातनम् ॥ "

इति चतुर्मुखवाक्ये आकाशप्रवेशप्रार्थनेनावगम्यते। नह्यनाकाश आकाशप्रवेश मर्थ्यते । अर्थितश्चात्र रामरूपो विष्णु राकाशप्रवेशं। अतश्चावगम्यते विष्णुराकाशएवेति । तस्मात्तादृशमाकाशत्वं विष्णोः परब्रह्मतासाधकं मुक्तं सुसंगतम् ।

(सेन्द्रैरित्यादि) उत्तर श्रीरामायणे ऽष्टोत्तरशततमे सर्गे–

" आराधयजगन्नाथ मिक्ष्वाकुकुलदैवतं ।
आराधनीयमनिशं सर्वैर्देवैस्सवासवैः ॥ "

इति विभीषणंप्रति श्रीरामचन्द्रवाक्यं । अत्रचेक्ष्वाकुकुलदैवतभूतस्य श्रीरंगनाथस्य विष्णो स्सर्वदेवाराधनीयत्वं स्पष्टमुक्तवान् रामभद्रः । सर्वदेवाराध्यत्वंच सर्वदेवोत्कृष्टतागमकमेव ।

(अन्यइत्यादि) " कविकुलतिलको वल्मीकजन्मामुनीन्द्रः", "अन्त्ये काण्डे " - उत्तरकाण्डे, " रामाकारं मुरारिं "- रामात्मनावतीर्णं विष्णुं, "वेदान्तवेद्यं परमं ब्रह्म " " स्फुटंप्राहे " त्यन्वयो बोध्यः । अत्रैव पूर्वोक्तानां पंचम्यन्तार्थाना मन्वयः ।

श्रीमद्वाल्मीकिकाव्ये श्रुतिशिखरहिते श्रेयसामेकहेतौ
तत्वोपायार्थ तत्वावगमनसरसे तत्रतत्रोदितेषु ।
हेतुष्वग्रचेषु पद्मापरिबृढ परमब्रह्मतासाधनार्थान्
कांश्चित् स्थालीपुलाककमतइह यथा मत्युपापीपदाम॥१९॥

एवं ' वाल्मीकिः ' इत्यादिना प्रथमतः श्रीमान्वाल्मीकि रादिकविस्त्व प्रबन्धे परंतत्वं लक्ष्मीपतिरेवेति निरचैषीदिति प्रतिज्ञाय, विष्णोः परत्व साधकेषु श्रीरामायणगतेषु हेतुषु केचिदेवात्र तत्प्रतिपादनाय संगृहीता इति निगमयति (श्रीमदित्यादि)

श्रीमदितिवाल्मीकेर्विशेषणम् । श्रीरिह 'साहि श्रीरमृतासत्तां' इत्युक्त वैष्णवसंपत्समृद्धत्वम । "उपदेशमनुप्राप्य वसिष्ठादृषिसत्तमात ॥ ततस्तपस्य तस्तस्य राममन्त्रार्पितात्मनः । दिव्यवर्षसहस्राणि व्यतीयुः क्षणवन्मुने " इत्यादि वाल्मीकिचरितोक्तेः अस्य वैष्णवत्व मविवादम् । वाल्मीकिपदेन च तपोनिष्ठातिशयोद्योत्यते । एतेन परमाप्तत्वमस्य स्पष्टमुक्तं भवति । यद्वा— श्रीमत्त्वंकाव्यस्यैवविशेषणम् । श्रीमत्त्वं चेतरवैलक्षण्यरूपोतिशयः । परमाप्तप्रणीतत्वं पुण्यश्लोकैकतत्परत्वं महाजनपरिगृहीतत्वं प्रबन्धनायक श्लाघितत्व मित्यादीनी तिहासान्तरेभ्यो स्य परमोत्कर्षप्रतिपादकान्यसाधारणानि गौरवापादकानि महिमस्थानि । ' नतेवागनृताकाव्ये काचिदत्रभविष्यती ' तिब्रह्मवरेणा नृतकथागन्धविदूरं काव्यमिदमिति प्रत्यभिज्ञापयितुं काव्य पदनिर्देशः । कान्तासंमितोपदेशदायित्वरूपविशेषा वगमाथच ।

" स्वादुकाव्य रसोन्मिश्रं शास्त्रमप्युपयुञ्जते ।
प्रथमंलीढ़मधवः पिबन्ति कटुभेषजम् ॥ "

इतिह्यालंकारिकाः ।

" हर्तुंतमस्सदसतीच विवेक्तुमीशो
मानं प्रदीपमिव कारुणिकोददाति । "

इत्युक्ते स्तत्वनिर्णये प्रधानफले शास्त्रात् वेदाख्यात् काव्यमेव सरसं सांम्राज्य मधितिष्ठतीति सर्वाभ्यर्हितेत्र युज्यते शास्त्रव्यवहारइति युक्तमुत्पश्यामः ।

" इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् । "
" इतिहासपुराणाभ्यां वेदान्तार्थः प्रकाश्यते ॥ "
" विधिमन्त्रार्थवादाख्या स्त्रयोभागास्त्रयीगताः ।
स्मृतिभिश्चेतिहासैश्च पुराणैश्चोपबृंहिताः ॥ "

इत्यादि प्रमाणप्रसिद्धिपरामर्शेन "अभ्यर्हितं पूर्वं" इतिशास्त्रसिद्धस्य अल्पाचः पुराणा त्पूर्वं निपातस्यावलोकनेनच ' श्रुतिशिखरहित ' इत्युक्तम् ।

" श्रेयसामेकहेतौ " श्रेयसां - ऐहिकामुष्मिकरूपाणां, प्रधानहेतौ ; अयत्नसम्पादकइतियावत् । अद्वितीयहेतौवा ।

" अपुत्रोलभतेपुत्र मधनोलभतेधनम् ।
सर्वपापैःप्रमुच्येत पदमप्यस्य यःपठेत् ॥ "
" यः पठे च्छृणुयाद्वापि चरितंराघवस्यह ।
भक्त्यानिष्कल्मषोभूत्वा दीर्घमायुरवाप्नुयात् ॥ "
" यस्त्विदं रघुनाथस्य चरितं सकलं पठेत् ।
सोमुक्षये विष्णुलोकं गच्छत्येव नसंशयः ॥
" रामायणमिदंकृत्स्नं शृण्वतः पठतस्सदा ।
प्रीयते सततं राम स्सहिविष्णुस्सनातनः ॥ "
" भक्त्यारामस्य येचेमां संहितामृषिणाकृताम् ।
लेखयन्तीहचनरा स्तेषां वास स्त्रिविष्टपे ॥ "

इत्याद्युपबृंहणवचनैः श्रीरामायण श्रवणपठनलेखन दानादीना मैहिकामुष्मिक सकलपुरुषार्थ प्रदत्वस्य स्पष्टमुद्घुष्टत्वादिति हृदयम् ।

मुमुक्षूणामवश्यं ज्ञातव्यं तत्वहितपुरुषार्थभेदभिन्नं प्रमेयत्रयं उप क्रमोपसंहारादि तात्पर्यनिर्णायक लिंगषट्केन प्रतिपादयतीति "तत्वोपायार्थानां" तत्वहितपुरुषार्थानां, " तत्वाव गमने " तवबोधनेविषये, तेनवा । " सरसे " ।

" तत्र तत्र " प्रकरणे, " उदितेषु " प्रतिपादितेषु । " अग्रयेषु " साधारण्यादि दोषदूरतया नन्यगतिकतया चाभ्यर्हितेषु, " हेतुषु " भद्धये । " ह्रीश्चतेलक्ष्मीश्चपत्न्यौ " इतिश्रौतप्रसिध्या लक्ष्मीपतिरेव परं ब्रह्मेति साधनं अर्थः प्रयोजनं येषान्तान् कांश्चित् " कतिचन ।

" स्थालीपुलाकक्रमतः " अतिविपुलायामपि स्थाल्यां पच्यमानस्यान्नरा शेर्मध्ये द्वित्रपुळाकमात्र परीक्षणेन पक्वापक्व विनिर्णय इतिलोकनीतिः । 'नखल्वखिलमपि निघृष्यते सुवर्णखण्डो वर्णनिष्कर्षाय ' इतिचा चार्याः ।

" मतिक्षयान्निवर्तन्ते न गोविन्दगुणक्षयात् "

इतिवत् " यथामती " त्युक्तं । विष्णोः परब्रह्मता साधकेषु श्री रामायण प्रतिपन्नेषु हेतुषु बहुषुसत्सु एतावतैव विरामे स्मदालस्यादिकमेव निदानमितिभावः ।

अथ प्रबंधस्यास्य सकलवैदिकजनादर योग्यता प्रकाशनाय वक्तृ विषय स्वरूपं निरूपयति (इत्थमिति)

इत्थं श्रीवादिभीकृद्गुरुवरकुलजः कृष्णसूर्यात्मजन्मा
कांचीवासी सुधीश्रीहयमुखचरणा सेव्यनन्तार्यनामा ।
वाल्मीकेर्भावदीपं रघुवरचरणा म्भोरुहस्नेहदीप्तं
स्वान्तध्वान्तौघविध्वंसनमचलमिहा रोपयामासदीप्रं ॥२०॥

श्रीवत्सकुलजलधिकौस्तुभो हस्त्यद्रिनाथापरावतारः श्रीभगवद्रामानुज मुनिवरप्रतिष्ठापित चतुस्सप्ततिपीठाधिपतिष्वन्यतमस्य श्रीरामानुजपूर्णस्य मुडुंबैनंबि संज्ञस्य वंशेजात स्तस्मादृशमः श्रीमल्लोकाचार्य पितृव्य पौत्रस्य पौत्रः तार्किककुल चूडामणिभ्यः श्रीकुमारवेदान्ताचार्येभ्यो धिगत शारीरकतत्वः श्रीमद्वरवरमुनि प्रतिष्ठापिताष्टदिग्गज प्रधानभूतः तैरेव श्रीभाष्यसिंहासने समभिषिक्तः तच्चरण नलिनवरिवस्या समासादित सकलार्थ तत्वजातः श्रीहस्त्यद्रि नाथगुरुः बाल्यएव मायावादि विजयकालसमधिगत प्रतिवादिभयङ्करबिरुदोत्र श्रीवादिभीकृद्गुरु रित्युच्यते । तस्यैव भुवनमहिते कुले जातोयं ग्रंथकारः ।

(कांचीवासीति)

" क इति ब्रह्मणोनाम तेनतत्राश्रितोहरिः ।
तस्मात्कांचीतिविख्याता पुरी पुण्य विवर्द्धनी ॥ "

इति निरुक्तनामधेयायां श्रीतुण्डीरमण्डल मण्डन सत्यव्रतक्षेत्र मध्यवर्तिन्यां सप्तमोक्षप्रदपुरी मध्यगणितायां कविकुलसार्वभौमैः " नगरीषुकांची " ति प्रशंसितायां कांचीनगर्यां वसतीति तथा ।

(श्रीहयमुखचरणा सेवीति)

" दाक्षिण्यरम्योगिरिशस्यमूर्ति र्देवीसरोजासन धर्मपत्नी ।
व्यासादयोपि व्यपदेश्यवाचः स्फुरन्तिसर्वे तवशक्तिलेशैः ॥"

इत्याद्युक्तप्रकारेण वेदाध्यापनादिना ज्ञानोपकारकस्य विभवावतारस्य हयग्रीवस्य चरणसेवारतोय मित्यर्थः ।

(भावदीपमिति) भावदीपमेव दीपमित्यर्थः । अस्य च दीपस्य श्रीरामभद्रचरण पंकजभक्तिरेव स्नेहइत्याह (रघुवरेति) प्रसिद्धोदीप स्तैलाज्यादि स्नेहदीप्तोभवति, अयंतु रघुवरं चरणांभोरुह स्नेहरूपेण स्ने

हेन दीप्त इतिभावः । अन्यदपि प्रसिद्धदीपसाम्य बीजमाह (स्वान्तेति) प्रसिद्धोदीपो ध्वान्तौघविध्वंसनः, अयमपि स्वान्तध्वान्ताना मन्यथाप्रतिप त्यादिरूपाणां विध्वंसन इतिभावः । प्रसिद्धदीपादस्य वैलक्षण्यमप्याह (अच लमिति) प्रसिद्धोदीपो वातेनाविचाल्यते, अयंतु दुर्वादवातै रविचाल्य इति भावः । (दीप्रमिति) प्रकर्षेण दीप्यमानामित्यर्थः ।

हयवदन चरणपङ्कज वरिवस्यालब्धू तत्वविज्ञानः ।
स्वयमेवानन्तार्यो व्यवृणो द्वाल्मीकिभावदीप मिमम् ॥



ಪುಸ್ತಕದ ಸಂಖ್ಯೆ.....

9049

SRI CHAMARAJENDRA SANSKRIT COLLEGE
LIBRARY
FORT, BANGALORE.

KARNATAKA SAMSK
7
18
L-1896